Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥श्रीमन्महाराजाधिराजराजराजेन्द्र
श्रीसवाईरामसिंहजीकीआज्ञासें



# ॥सटीकभर्तृहरिशतकत्रयम्॥

॥सम्वत १९०७ का॥ ॥



पुस्तकछपवाईमुनसीकिसनसहा
यनेश्रीसवाईजयनगरसैं॥ ॥

For Private and Personal Use Only

For Private and Personal Use Only

॥श्रीगणेशायनमः॥विघ्नेशंविघ्नहर्तारंगणराजंनमाम्यहम्॥शारदांवरदांनौमिजाड्यापनुत्तयेतथा॥१॥श्रीगोपालंनमस्कृत्यन(
त्वागुरुपरंपराम्॥भर्तृहरिकृतोग्रन्थस्तस्यव्याख्यांकरोम्यहम्॥२॥दिक्केति।दशदिशःसुतथाभूतभविष्यवर्तमानत्रिकालेषु
चअनवच्छिन्नंअतएवअनन्तं अन्तोनास्तिचिन्मात्रंज्ञानमेवमूर्तिःस्वरूपंयस्यतथा।स्वानुभूतिःस्वस्यअनुभवःसएवए(
कःसारांशोयस्य।एतादृशेःशान्तायतेजःब्रह्मरूपंतस्मैनमः।ग्रन्थादौग्रन्थमध्येग्रन्थान्तेमङ्गलमाचरणीयमितिशिष्टाचा(
रोस्ति।अतोग्रन्थकर्त्रामङ्गलंनमनात्मकंकृतम्।प्रयोजनमनुद्दिश्यमन्दोपिप्रवर्तते।एवंनीतिर्वर्तते।तर्हिकेनकार(
णेनग्रन्थःकृतःतत्कारणंयेनवैराग्योत्पत्तिस्तल्लिखति।यांचिन्तयेति।धिक्‌योगेद्वितीयाभवतिअतोद्वितीयाविभक्तिरु

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये॥स्वानुभूत्येकसारायनमःशान्तायतेजसे॥१॥यांचिन्तया
मिसततंमयिसाविरक्तासाप्यन्यमिच्छतिजनंसजनोन्यसक्तः।अस्मत्कृतेचपरितुष्यतिकाचिदन्याधि(
क्तांचतंचमदनंचइमांचमांच॥२॥

क्ता।राज्ञात्रिविक्रमशाकेनस्वलब्धंफलंकस्मैचिद्ब्राह्मणायदत्तम्।तस्यफलस्यम
हिमायेनभक्षितंस अमरोभवति।तत्फलंब्राह्मणेनमनसिविचार्यवसुधापालकोराजाभर्तृहरिरमरोभवत्विति।तस्मै
दत्तम्।राज्ञापिस्वपत्नीअतिप्रियतमातस्यैदत्तम्।तयापिकश्चनजारस्तस्मैदत्तम्।जारेणापिस्वस्यप्रियाकाचनपुंश्च
लीतस्यैदत्तम्।तयापिममायोग्यंनृपयोग्यमित्यर्पितुमानीतंतत्फलंएकस्मिन्दिनेपुंश्चलीसमीपेराज्ञादृष्टम्।पश्चात्
शोधःकृतःतावत्पूर्वोक्तपरंपराज्ञातापश्चाद्वैराग्येणनिन्दति।अहंयांस्वस्त्रियंसततंचिंतयामिप्राणादधिकांसामयिविर

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्ता। सा स्त्री अन्यं जारं प्रियतमं इच्छति। सोपि अन्यां पुंश्चलीं प्रियत्वेन इच्छति। एवं मदर्थेपि काचन स्त्री मया सह संगो भवित
व्य इति मनसि संतुष्टिं मानयिष्यति। एवं न कश्चित्कस्य चित्प्रियः। अतो निन्दति सा पुंश्चली तां धिक्। स जारः तं धिक्। इयं मदी
या स्त्री इमां च धिक्। अहमपि एतादृशो मूर्खः मां च धिक्। इदं सर्वं मदनकृतं जातं मनो मदनं च धिक्। एवं जाते सति स्वस्मिन्मू
र्खत्वं ज्ञातं अतो मूर्खलक्षणानि वदति।२। अज्ञेति। यः केवलं न जानाति स अज्ञः मूर्खः स तु शिष्टेन युक्तायुक्तमुक्तं तत् शृणो
ति तथैव करोति। अतो सुखेन आराधितुं वशीकर्तुं शक्यः यस्तु विशेषं युक्तायुक्तं जानाति स विशेषज्ञः। कदाचित्प्रमादा

दज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः। ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रंजयति।३। प्रसह्य मणि
मुद्धरेन्मकरवक्त्रदंष्ट्रांकुरात् समुद्रमपि संतरेत्प्रचलदूर्मिमालाकुलम्। भुजंगमपि कोपितं शिरसि पु
ष्पवद्धारयेन्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्।।४।। इयुक्ते कर्मणि प्रवृत्तः सन् परेण निवारितश्चेत् शृ
णोति। स तु अत्यल्पं वशीकर्तुं शक्यः। अधुना उभयोर्विलक्षणः अज्ञो न भवति पूर्णज्ञातापि न भवति शास्त्रे प्रवेशो नास्ति
वक्तृश्रुततया स्वस्मिन् पंडितंमन्यतया परस्य वचनं न शृणोति। किंचित् ज्ञानलवेन दुर्विदग्धः कुगर्वितः तं वशीकर्तुं ब्र
ह्मापि न शक्तः इतरेषां का वार्ता।।३।। अधुना मूर्खः सन् प्रतिनिविष्टचित्तः तस्य चित्तमाराधितुं न शक्यः आराधना भावे दृ
ष्टान्तेन वदति। मकरो नाम जलचरविशेषस्तस्य वक्त्रदंष्ट्रांकुरः तस्मात् मणिं प्रमणिः प्रसह्य बलात्कारेण निःकाशितुं श
क्यो भवेत्। मकरवक्त्रे मणेरभाव एव तस्यापि कालेन भावो भविष्यति। तथा चलन्त्य ऊर्मीणां लहरीणां मालाः समुद्र २

For Private and Personal Use Only

स्तेराकुलंसमुद्रमपिबाहुभ्यांसंतरेत्।तथाचकोपितंभुजङ्गंशिरसिपुष्पवद्धारयेत्।एतेअघटिताःदृष्टान्ताःकालेन
भविष्यन्ति।परंतुप्रतिनिविष्टःआविष्टचित्तःयस्मनसिष्टतंतन्नत्यजतिकस्यापिवचनंनशृणोति।तस्यमूर्खस्यचि
त्तमाराधितुंनशक्यम्।ज्ञातापिआविष्टचित्तःसन्यत्किंचित्करोतिस्वहितंनजानातिसोपिमूर्खोन्तःपात्येवयथारा
वणदुर्योधनादयः॥४॥लभेतेति।सिकतासुवालुकासुतैलंयत्नतःप्रयासेनपीडयन्सन्कदाचिल्लभेत्।तथाचतृषा

लभेतसिकतासुतैलमपियत्नतःपीडयन्पिबेच्चमृगतृष्णिकासुसलिलंपिपासार्दितः॥कदाचिदपि
पर्यटन्शशविषाणमासादयेन्नतुप्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥५॥व्यालंवालमृणालत
न्तुभिरसौरोद्धुंसमुज्जृम्भतेछेत्तुंवज्रमणीन्शिरीषकुसुमप्रान्तेनसन्नह्यते॥माधुर्यंमधुबिन्दुनारच
यितुंक्षाराम्बुधेरीहतेनेतुंवाञ्छतियःखलान्पथिसतांसूक्तैःसुधास्यन्दिभिः॥६॥ ॥

र्तःसन्मृगतृष्णिकासुसलिलंकदाचित्पिबेत्।कदाचित्पृथ्वींपर्यटन्सन्शशस्यविषाणंशृङ्गंप्राप्नुयात्।एवम
घटितघटनंभविष्यति।परंतुप्रतिनिविष्टमूर्खजनस्तस्यचित्तंनआराधयेत्॥५॥व्यालमिति।व्यालंसर्पंबालमृणाल
तन्तुभिःकोमलकमलतन्तुभिःरोद्धुंबद्धुंयथावाञ्छतितथाचवज्रमणीन्शिरीषपुष्पाग्रेणसच्छिद्रान्कर्तुंसन्न
द्धोभवति।यथाचक्षारसमुद्रस्यमधुविन्दुनामाधुर्यंकर्तुंईहतेचेष्टते॥एवंयथाअघटितानिकर्तुमिच्छति।तथा
खलान्सतांमार्गेनेतुममृततुल्यैःसूक्तैर्वाग्भिर्वाञ्छतिदुष्टाःसन्मार्गेवर्त्तयितुंनशक्याइत्यर्थः॥६॥ ॥ ॥

भर्तृ०नी०
२

स्वायत्तेति। अपण्डितानांमूर्खाणामज्ञतायाः मौर्ख्यस्यछादनमाच्छादनंमौनंविधात्राब्रह्मणानिर्मितम्। कथंभूतंमौनं
स्वायत्तंस्वाधीनम्। पुनःकथंभूतंएकान्तगुणंरहस्यंतदेवमौनंसर्वविदांसर्वज्ञानिनांसमाजेसभायांभूषणंविशेषतोभवति
७। यदायस्मिन्कालेकिंचित्ज्ञोहमहमपिकिंचिज्ज्ञानामीतिद्विपइवकरीवमदान्धःसमभवंजातोस्मितदातस्मिन्का
लेअहंसर्वज्ञमितिममनोगर्वितमभवत्तत्उपरियदाबुधपण्डितजनसकाशात्पण्डितेभ्यःकिंचित्किंचित्ज्ञातंतदा

स्वायत्तमेकान्तगुणंविधात्राविनिर्मितंछादनमज्ञतायाः॥ विशेषतःसर्वविदांसमाजेविभूषणंमौ
नमपण्डितानाम्॥७॥ यदाकिंचित्ज्ञोहंद्विपइवमदान्धःसमभवंतदासर्वज्ञोस्मीत्यभवदवलिप्तंम
ममनः॥ यदाकिंचित्किंचित्बुधजनसकाशादवगतंतदामूर्खोस्मीतिज्वरइवमदोमेव्यपगतः॥८॥
कृमिकुलचितंलालाक्लिन्नंविगर्हिजुगुप्सितंनिरुपमरसप्रीत्याखादन्नरास्थिनिरामिषम्॥ सुर
पतिमपिश्वापार्श्वस्थंविलोक्यनशङ्कतेनहिगणयतिक्षुद्रोजन्तुःपरिग्रहफल्गुताम्॥९॥ ॥ ॥

अहंमूर्खोस्मीतिज्ञातंपूर्वयोमदः अभवत्सोपिज्वरइवममव्यपगतः नष्टः।८। क्षुद्रोजनःपार्श्वस्थंसुरपतिमपिविलो
क्यहिइतिनिश्चयेननशंकतेनगणयतिनिंद्यंकर्मकरोत्येवयथाश्वानरस्यअस्थिकृमिकुलैर्युक्तंलालयालुलितं
विगर्हितंजुगुप्सितंनिन्द्यंनिरामिषंमांसरहितंएतादृशमपिनिरुपमरसप्रीत्याखादन्नलज्जते। तद्वत्क्षुद्रोनीचोज
न्तुःपरिग्रहस्यफल्गुतांनिःसारतांनगणयतिनलज्जते॥९॥ ॥ ॥ ॥ ॥ २

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विष्णुपादोदकमादौ स्वर्गं पतति स्वर्गात् शार्वं शार्वो महादेवस्तस्येदं शार्वं शिरः तस्मात्पतितं शिरसः महीधरं पर्वतं महीध्रा(
दुत्तुङ्गात् पर्वतमस्तकात् अवनीं पृथ्वीं अवनेश्चापि जलनिधिं समुद्रं एवं जलमधोधः पदं स्थानं प्राप्तं सा इयं गङ्गा (
स्तोकं क्षुद्रं पदं शतमुखैः सागरं प्राप्ता। एवं विवेकभ्रष्टानां अविवेकिनां शतमुखं अधःपतनं गङ्गाजलवद्भवतीत्यर्थः॥
१०॥ जलेन हुतभुक् अग्निः निवारयितुं शक्यः। छत्रेण सूर्यातप उष्णं निवारयितुं। नागेन्द्रो हस्ती समदः अङ्कुशेन नि

शिरः शार्वं स्वर्गात्पतति शिरसस्तत्क्षितिधरं महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम्। अधो
गङ्गा सेयं पदमुपगता स्तोकमथवा विवेकभ्रष्टानां भवति विनिपातः शतमुखः॥१०॥ शक्यो वा
रयितुं जलेन हुतभुक् छत्रेण सूर्यातपो नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ व्या
धिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्॥
११॥ साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः। तृणं न खादन्नपि जीवमानस्तद्
भागधेयं परमं पशूनाम्॥१२॥

शितेन तीक्ष्णेन वारयितुं शक्यः दण्डेन गोगर्दभौ वृषभगर्दभौ वा। भेषजेन
औषधविधिना नियमेन व्याधिर्वा। मन्त्रप्रयोगैर्विषं वा। एवं सर्वस्य शास्त्रविहितमौषधं निरसनप्रकारोऽस्ति॥११॥ सा
हित्यस्य संगीतस्य कलानामनभिज्ञः ज्ञानं नास्ति एवंभूतो यो नरः सः पुच्छविषाणरहितः साक्षात्पशुः तदा तेन तृणं
भक्षणीयं तत्तु न खादन् जीवत्यपि। इदं तु इतरपशूनां परममुत्कृष्टं भागधेयमदृष्टम्॥१२॥ ॥ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ०नी० येषांन विद्या नतपो न दानं न शीलं सद्वृत्तम् । तदपि च न गुणः सत्वगुणो धर्मो नैव । एवंभूता ये मनुष्यास्तेऽस्मिन्मृत्यु
४ लोके भुवि भारभूताः सन्तो मनुष्यरूपेण मृगा एव विचरन्ति ।१३।१४। इति अज्ञप्रशंसा । अथ विद्वत्प्रशंसा । व्याकर
णाभिधानादिभिः शास्त्रैरुपस्कृताः शिक्षिताः शब्दास्तैः सुन्दरा गीर्वाणी येषां ते । तथा च शिष्येभ्यः प्रदेया दत्ताः प्रा(
ढिताः । आम्नाया वेदशास्त्राणि यैस्ते । तथा च सर्वलोकेषु विख्याताः प्रसिद्धाः कवयः कवित्वं कुर्वाणाः एवंभूता विद्वां

येषांन विद्या नतपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ॥ ते मृत्युलोके भुवि भारभूता मनुष्य
रूपेण मृगाश्चरन्ति ॥ १३॥ वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ॥ न मूर्खजनसंपर्कः सुरे
न्द्रभवनेष्वपि ॥ १४॥ शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा विख्याताः कवयो
वसन्ति विषये यस्य प्रभोर्निर्धनाः ॥ तज्जाड्यं वसुधाधिपस्य कवयो ह्यर्थं विनापीश्व
राः कुत्स्याः स्युः कुपरीक्षकैर्न मणयो यैरर्घतः पातिताः ॥ १५॥ ॥

सोऽयं स्य प्रभो विषये देशमध्ये वसन्ति अथ च निर्धना धनरहिताः राजा तान्नैव जानाति परामर्शेन गृह्णाति तत्र
वसुधाधिपस्य राज्ञः जाड्यं मौर्ख्यं कवयस्तु सुधियः ते अर्थं विनापि ईश्वराः समर्थाः अत्र दृष्टान्तः । यथा महामण
यो बहुमूल्यास्ते कुपरिक्षकैः कुत्सितपरीक्षकैः अज्ञातास्त अर्घतः मूल्यतः पातिता न्यूनमूल्याः कृताः । तर्हि
अयं दोषः परीक्षकाणां न तु मणीनाम् । परीक्षकाः कुत्स्याः स्युः कुत्सिता एव न तु मणयः ॥ १५॥ ॥ ४

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नृपाः राजानः येषां विद्याख्यमन्तर्धनं वर्त्तते तान्प्रति मानमहङ्कारं उज्झत त्यजत। कथंभूतं विद्याख्यं धनम्॥
र्तुः तस्करस्य यत् गोचरं न याति। तस्य दृश्यं न भवति। पुनः कथम्। किमपि अनिर्वचनीयं शं सुखं पुष्णाति। पु
नः कथं सर्वदा सर्वकालेष्वपि अर्थिभ्यः शिष्येभ्यः प्रतिपाद्यमानं दत्तं परामुत्कृष्टां वृद्धिं प्राप्नोति। पुनः कल्पान्तेष्वपि
निधनं नाशं न प्रयाति। न प्राप्नोति। एतादृशं येषामन्तर्धनं तैः सह कः स्पर्द्धते स्पर्द्धां करोति। १६। अधिगतः प्राप्तः प

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदाप्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नो
ति वृद्धिं पराम्॥ कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं येषां तान्प्रति ।
मानमुज्झत नृपाः कस्तैः सह स्पर्द्धते॥ १६॥ अधिगतपरमार्थान्पण्डितान्मावमंस्थाः
तृणमिव लघु लक्ष्मीर्नैव तान्संरुणद्धि॥ अभिनवमदलेखाश्यामगण्डस्थलानां
न भवति विसतन्तुर्वारणं वारणानाम्॥ १७॥

रमार्थो यैः तान्प्रति मावमंस्थाः॥ तेषामपमा
नं मा कुरु॥ तान्प्रति लक्ष्मीः लघु तृणमिव लक्ष्मीः तान् नैव संरुणद्धि रोद्धुं न शक्नोति। अत्र दृष्टान्तः
अभिनवा सुन्दरा मदजलरेखा तया श्यामायमानानि गण्डस्थलानि येषां ते। एवंभूतानां वारणानां ग
जानां विसतन्तुः कमलकेसरतन्तुः किं वारणानां रोद्धुं न भवति शक्नोति। अतः पण्डितानां अवज्ञा न कर्तव्या॥
१७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योयस्यस्वाभाविकः सद्गुणः तद्गुणं न कोपि हर्तुं शक्नोति। अत्र दृष्टान्तः। अम्भसि जाताः कमलिन्यः तासां वनं तत्र निवा-
सः वसतिस्थानं तेन विलासः रम्भः। एतादृशं हंसस्य विलासं विधाता ब्रह्मा नितरामत्यन्तं कुपितश्चेत् विलासमेव ह-
न्ति। न तु दुग्धजलयोर्भेदविधौ या प्रसिद्धा वैदग्ध्या चातुर्या हंसस्य कीर्त्तिः तां असौ ब्रह्मापि हर्त्तुं न समर्थः तत्र इत्त-
रेषां का वार्त्ता॥१८॥ केयूराः बाहुभूषणानि चन्द्रवदुज्वलाः मुक्ताफलानां हाराः शुद्धं स्नानं विलेपनं गन्धादि

अम्भोजिनीवननिवासविलासमेव हंसस्य हन्ति नितरां कुपितो विधाता॥ न त्वस्य दुग्धजलभेदवि-
धौ प्रसिद्धां वैदग्ध्यकीर्त्तिमपहर्त्तुमसौ समर्थः॥१८॥ केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्वला न।
स्नानं न विलेपनं न कुसुमं नालंकृता मूर्द्धजाः। वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते क्षीय-
न्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥१९॥

कं कुसुमं पुष्पं च अलङ्कृताः सज्जीकृताः धूपिताः मूर्धजाः केशाः एते पदार्थाः पुरुषं न भूषयन्ति। यदा मौर्ख्यं पुरुष-
स्य अस्ति तदा एभिः किं भूषणं भवति। नहि किं। एका वाक् सम्यक्प्रकारेण अलङ्करोति। शोभयति। सापि वाक् या संस्कृ-
ता पुरुषेण धार्यते। सकलविभूषणानि क्षीयन्ते। एकं वाग्भूषणं न क्षीयते। अतः सततं सर्वकालं वाग्भूषणमेव भूषणं॥१९॥ ५

For Private and Personal Use Only

गुरुषस्यइत्यादिकंधनंलक्षनंनभवतिततक्षीयतेतस्कराद्भिर्नीयतेगोप्यंनभवति।अतोविद्यानामधनंतत्समीचीनंबहु
गुणम्।कथंभूतंविद्याख्यंधनम्।नरस्यअधिकंरूपंकरोति।तथाचप्रच्छन्नंगुप्तंधनंभवति।विद्याभोगकरीभोगान्करो
ति।यशःकीर्त्तिसुखंकरोति।विद्यागुरूणांगुरुः।क्षुद्रगुरवःसर्वविद्यासंपूर्णप्राज्ञंप्रष्टुं आयान्ति।सप्राज्ञःगुरूणामपिगुरुः
अर्थंचगृणातिहितमुपदिशतीतिगुरुरितिगुरुपदव्याख्यानम्।अतोहितकर्त्री विद्यैव।विदेशगमनेविद्यावन्धुजनः
विदेशेयेजनास्तेविद्ययावन्धुजनाएवभवन्ति।विद्यापरंदैवतम्।राजसुपूजितायेषांविद्यातेसज्ञांसभासुपूजिताभवन्ति।तथा

विद्यानामनरस्यरूपमधिकंप्रच्छन्नगुप्तंधनंविद्याभोगकरीयशःसुखकरीविद्यागुरूणांगुरुः।विद्यावन्धुज
नोविदेशगमनेविद्यापरंदैवतंविद्याराजसुपूजितानतुधनंविद्याविहीनःपशुः।२०।क्षान्तिश्चेत्कवचेनकिं।
किमरिभिःक्रोधोस्तिचेद्देहिनांज्ञातिश्चेदनलेनकिंयदिसुहृद्दिव्यौषधैःकिंफलम्।किंसर्प्पैर्यदिदुर्जनाःकि
मुधनैःविद्यानवद्यायदिव्रीडावेत्किमुभूषणैःसुकवितायद्यस्तिराज्येनकिम्।२१। धनाद्यापूजिताभवन्ति॥

अतोविद्याविहीनोयःसपशुरेव।२०।देहिनांप्राणिनांयदिक्षान्तिःक्षमावर्त्ततेतदाकवचेनवर्म्मणाकिं।तथाचक्रोधोस्तितर्हि
अरिभिःशत्रुभिःकिंज्ञातिश्चेदनलेनअग्निनाकिंदायादाःसहजारयइतिवर्त्तते।ज्ञातयोयदानिन्दादिपुरुषंवदन्तितेनै
वदाहोभवतीति।अग्नेःकिंप्रयोजनं।यदिसुहृत्सखावर्त्ततेतदादिव्यौषधैःकिंफलंप्रयोजनम्।ससुहृत्सर्वहितंकरोति
यदादुर्जनाःसन्तितदासर्पैःकिंसर्पाःदंशविषवेगेणमारयन्तितथादुर्जनाअपिछिद्रान्वेषणेनमारयन्ति।यदिअनवद्यासुत

सुं० रासंपूर्णाविद्यास्तितदार्थनेः किं। यदिव्रीडालज्जा असत्कर्मसुवर्त्तते। तदातदेवभूषणं इतरभूषणैः किं। यदिसुक।
६ विताचातुर्यमस्तितदाराज्येनकिं। २१। दाक्षिण्यमौदार्यमितराणिपदानिस्पष्टानि। २२। सत्संगतिः पुंसां किंनकरोति
करोतीतिकथयवद। तत्किं धियः बुद्धेः जाड्यं मौर्ख्यमदतां हरतिपापं दूरीकरोति। चेतः प्रसादयति। स्वच्छं क

दाक्षिण्यंस्वजनेदयापरजनेशाठ्यंसदादुर्जनेप्रीतिः साधुजनेनयोनृपजनेविद्वज्जनेष्वार्जवम्। शौर्यंशत्रु
जनेक्षमागुरुजनेनारीजनेधूर्त्ततायेचैवंपुरुषाः कलासुकुशलास्तेष्वेवलोकस्थितिः। २३। जाड्यंधि
योहरतिसि ञ्चतिवाचिसत्यंमानोन्नतिंदिशतिपापमपाकरोति। चेतः प्रसादयतिदिक्षुतनोतिकी
र्त्तिंसत्संगतिः कथयकिंनकरोतिपुंसाम्। २३। जयन्तितेसुकृतिनोरससिद्धाः कवीश्वराः। नास्तियेषां
यशः कायेजरामरणजंभयम्। २४। सूनुः सच्चरितः सतीप्रियतमास्वामीप्रसादोन्मुखः स्निग्धंमि
त्रमवञ्चकः परिजनो निःक्लेशलेशंमनः। आकारोरुचिरः स्थिरश्चविभवोविद्यावदातंमुखंतुष्टे
विष्टपहारिणीष्टदहरौसंप्राप्यतेदेहिना। २५। रोति। सर्वदिक्षुकीर्त्तितनोति। विस्तारयति। २३। सूनुः पुत्रः सच्च

रितः सद्वृत्तः। सतीप्रियतमास्वामीप्रसादोन्मुखः। स्निग्धंस्नेहयुक्तंअवञ्चकंमित्रम्। परिजनः स्वकीयजनसमुदाय
ः निःक्लेशलेशंआधिरहितंस्वच्छंमनः। आकारोरुचिरः स्थिरश्चविभवः सामर्थ्यम्। विद्ययाअवदातंशोभनंमु
खमिति। एतेपदार्थाविष्टपहारिणिस्वर्गवासिनिहरौनारायणेतुष्टेप्रसन्नेसतिदेहिनापुरुषेणप्राप्यते॥ २५॥ ६

प्नोति। परेषां प्राणघातान्निवृत्तिः परधनहरणे संयमः चित्तस्य नियमनं सत्यं वाक्यं यथा काले शक्त्या दानं परेषां युवतिज
नकथासु मूकभावः तृष्णा लक्षणं स्रोतः सेतुः तस्य भङ्गः गुरुषु विनयः सर्वभूतेषु अनुकम्पा करुणा एते पदार्थाः सर्वशास्त्रेषु
सामान्यतः साकल्येन अनुपहतविधिः नत्यकः विधिः मर्यादा एवंभूतः श्रेयसां पुण्यानां एष पन्था मार्गः मोक्षः ॥२६॥ नीचैः क्षु
द्रैः विघ्नभयेन यत्किंचित्कर्म न आरभ्यते न अनुष्ठीयते। मध्यमाः आदौ आरम्भं कृत्वा पश्चात् विघ्नविहताः बाधिताः सन्तः कार्यं

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं काले शक्त्या प्रदानं युवतिजनकथामूकभावः परे
षाम्। तृष्णास्रोतो विभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रे
यसामेष पन्थाः ॥२६॥ आरभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमन्ति मध्याः। विघ्नैः पु
नः पुनरपि प्रतिहन्यमानाः प्रारभ्य उत्तमजना न परित्यजन्ति ॥२७॥ प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्
गेऽप्यसुकरं त्वसन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः। विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां सतां

तथैव परित्यजन्ति। उत्तमजनास्तु यदारब्धं कार्यं तस्मिन्नेव पुनः पुनः विघ्नेन प्रतिहता अपि न परित्यजन्ति ॥२७॥ अ
सन्तो दुष्टाः नाभ्यर्थ्याः न याचनीयाः। कृशधनः अल्पधनः सुहृदपि न याच्यः। सर्वेषां प्रिया न्याय्या वृत्तिः विशुद्धा। वृत्तिर्वर्त
नं असुभङ्गेऽपि मलिनं पापं असुकरं नैव करोति। विपदि आपत्तौ उच्चैः स्थेयं महत्त्वे स्थितो न च नितरां गौरवं न
त्यजति। महतां पदं अनुविधेयम्। यथा महान्तो स्वपदे स्वस्थाने महत्त्वेन स्थितास्तथैव अयमपि अनुकरोति
इति विषमं असिधाराव्रतं नैष्ठिकं व्रतं सतां केनोपदिष्टं न केनापि उपदिष्टम्। अयं सतां स्वाभाविको गुणः इत्यर्थः। इति।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री

भ०टी० अथमानशौर्यजत्रांसा।क्षुत्क्षामोपिक्षुधयाक्षामःहीनसत्वोपिजरयाकृशोपिविगतप्रायोपिएवंकष्टांदशांआ
१४ पन्नःप्राप्नोति।विपन्नदीधितिरपिनिस्तेजाअपि।प्राणेषुनश्यत्स्वपिमरणसमयप्राप्तोपि।एवंजातेसतिक्षुधाना
र्तार्थकेसरीसिंहःकिंजीर्णतृणमत्तिभक्षयति।कथंभूतःकेसरी।मत्ताश्चतेइभेन्द्राश्चतेषांविभिन्नाःविदारिताःकु
म्भाःगण्डस्थलानितेषुयेमांसकवलास्तेषांग्रासास्तेषुबद्धस्पृहाशयेन।पुनःकथंभूतःमानेनअभिमानेनमहा

क्षुत्क्षामोपिजराकृशोपिशिथिलप्रायोपिकष्टांदशामापन्नोपिविपन्नदीधितिरपिप्राणेषुनश्यत्स्वपि
मत्तेभेन्द्रविभिन्नकुम्भदलनग्रासैकबद्धस्पृहः।किंजीर्णतृणमत्तिमानमहतामग्रेसरःकेसरी॥२९॥स्व
ल्पंस्नायुवसावशेषमलिनंनिर्मांसमप्यस्थिगोःश्वालब्ध्वापरितोषमेतिननुतत्तस्यक्षुधाशान्तये।सिं
होजम्बुकमङ्कमागतमपित्यक्त्वानिहन्तिद्विपंसर्वःकृच्छ्रगतोपिवाञ्छतिजनःसत्वानुरूपंफलम्
३०

न्तःतेषांमध्येअग्रेसरी।अग्रगण्यःअहङ्कारयुक्तःएवंसिंहवत्अहङ्कारवान्पुरुषार्थीपुरुषोपिक्षुद्रंकार्यंनअव
लम्बते।२९।स्वल्पंअथचस्नायुवसादिअल्पतांतवस्तेषामवशेषंशेषमात्रम्।तदपिमलिनंनिर्मांसंमांसरहितंएवंभूतमपि टि
गोःवृषभस्यअस्थिश्वालब्ध्वाप्राप्यसंतोषमेति।परंतुतत्तस्यपुनःक्षुधाशान्त्यर्थंनभवति।सिंहस्तुजम्बुकमङ्कसमीपमा
गतमपित्यक्त्वाद्विपंहस्तिनमेवनिहन्ति।एवंसर्वोजनःकृच्छ्रंकष्टंप्राप्तोपिसत्वानुरूपंसामर्थ्यानुरूपंफलमिच्छति॥३०॥ ७

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्वापिण्डदस्यपिण्डंग्रासंददातितिस्यपुरतःलाङ्गूलस्यपुच्छस्यचालनंतथाचअधश्चरणावपातंचरणानांपतनंतथा।
चभूमौनिपत्यपतित्वावदनोदरस्योर्दर्शनंदर्शयति।एवंकुरुते।गजपुङ्गवः।गजश्रेष्ठःहस्तीधीरंविलोकयति।चाटुश
तैःप्रियवचनशतैःप्रार्थितःसन्भुङ्क्ते।एवंक्षुद्रजनःमानहीनस्थलेऽवमानितोपिपुनःपुनःयाचयत्येव।धीरःप्र
र्थितोपिनैवआयाति।मानपुरःसरंगृह्णातीत्यर्थः॥३०॥३१॥३२॥अनयोर्द्वयोःस्पष्टोऽर्थः।संत्येति।बृहस्पतिप्रभृतयः।

लाङ्गूलचालनमधश्चरणावपातंभूमौनिपत्यवदनोदरदर्शनंच॥श्वापिण्डदस्यकुरुतेगजपुङ्गवस्तु
धीरंविलोकयतिचाटुशतैश्चभुङ्क्ते॥३१॥परिवर्तिनिसंसारेमृतःकोवानजायते॥सजातोयेनजातेनय
तिवंशःसमुन्नतिम्॥३२॥कुसुमस्तवकस्येवद्वयीवृत्तिर्मनस्विनः॥मूर्ध्निसर्वस्यलोकस्यविशीर्येतवनेथ
वा॥३३॥संत्यन्येपिबृहस्पतिप्रभृतयःसंभाविताःपञ्चषास्तान्प्रत्येषविशेषविक्रमरुचीराहुर्नवैरायते
द्वावेवग्रसतेदिनेश्वरनिशाप्राणेश्वरौभास्वरौभ्रातःपर्वणिपश्यदानवपतिःशीर्षावशेषीकृतः॥३४॥

पंचषड्वा।संभाविताःमहान्तःसन्ति।तान्प्रतिएषराहुःविशेषविक्रमरुचिःसन्नवैरायतेनवैरंकरोति।पर्व
णिदिनेश्वरःसूर्यःनिशाप्राणेश्वरःचन्द्रःद्वावेवभासुरौतेजस्करावपिग्रसते।कथंभूतोराहुःदानवपतिःशीर्षा
वशेषीकृतःअतोभ्रातःएवंकिमुक्तंवैरिणःशेषोनस्थाप्यःनिःशेषःकर्तव्यः॥३४॥ ॥ ॥ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

।० वृ०
८

शेषः भुवनश्रेणीं फणाफणकस्थितां फणामण्डलस्थितां वहति। स शेषः कमठपतिना कूर्मेण पृष्ठमध्ये सदाधा
र्यते। तं कूर्मं पयोनिधिः समुद्रः अनादरात् क्रोडउत्सङ्गास्तरथीनं कुरुते एवं महतां चरित्रविभूतयः निःसीमानः
महतां सामर्थ्यं निःसीममपरिमितम्॥२५॥ तुहिनाद्रेः हिमालयस्य सूनोः पुत्रस्य समरमघवन्मुक्तकुलिशप्रहा
रैः मदेनयुक्तो मघवान् इन्द्रः तेन मुक्ताः कुलिशप्रहाराः तैः पक्षच्छेदः वरं श्रेष्ठः कथंभूतैः उरुज्वलः वक्रलादह

वहति भुवनश्रेणीं शेषः फणाफणकस्थितां कमठपतिना मध्ये पृष्ठं सदा स विधार्यते॥ तम
पि कुरुते क्रोडाधीनं पयोधिरनादरादहह महतां निःसीमानश्चरित्रविभूतयः॥२५॥ वरं पक्षच्छे
दः समरमघवन्मुक्तकुलिशप्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः॥ तुषाराद्रेः सूनोरहह
पितरि क्लेशविवशे न चासौ संपातः पयसि पय सांपत्यरुचितः॥२६॥ यदचेतनोऽपि पादैः
स्पृष्टः प्रज्वलति सवितुरविकान्तः॥ तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते॥२७॥ ।

तस्य उद्गारास्तैर्गुरुभिः पृथुभिः एवंभूतैः वज्रप्रहारैः पक्षच्छेदः वरं श्रेष्ठः न तु पितरि हिमाद्रौ क्लेशविवशे पक्षच्छेदे।
न क्लेशायुक्ते सति तं पितरं त्यक्त्वा पयसां पत्युः समुद्रस्य पयसि उदके संपातः मज्जनपतनमुचितं न॥२६॥ यदचेत
नोऽपि सूर्यकान्तः सवितुः सूर्यस्य पादैः किरणैः स्पृष्टः सन् प्रज्वलति एवं सति सचेतनो तेजस्वी पुरुषः परकृतनि
कृतिं तिरस्कारं कथं — सहत इत्यर्थः॥२७॥ ॥ ॥ ॥ ॥ ८

शिशुरपि सिंहः मदेन मलिनाः कपोलभित्तयो येषां तेषु गजेषु निपतति। इयं सत्ववतां बलवतां प्रकृतिः स्वभावः अतः खलु
निश्चयेन तेजसां हेतुः न वय इति॥ मानशौर्यप्रशंसा समाप्ता॥ अथ अर्थप्रशंसा॥ जातिः स्वजातिमहत्वं रसातलं यातु गच्छ
तु। गुणगणाः ये सद्गुणास्तेषां गणः समुदायः रसातलस्यापि अधः गच्छताम्। शीलं सद्वृत्तं शैलाः पर्वतास्तेषां तटेषु पत
तु। अभिजनः स्वजनः वह्निना दह्यतु। शौर्येण या वित्तं न प्राप्यते। अतस्तद्वैरी शौर्यं तस्मिन् वज्रं आशु शीघ्रं निपततु। एवं सर्व

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु॥ प्रकृतिरियं सत्ववतां न खलु वयस्तेजसो हेतुः॥ ३८॥
जातिर्यातु रसातलं गुणगणस्तस्याप्यधो गच्छतां शीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना। शौर्ये वैरि
णि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे॥ ३९॥ तानीन्द्रियाणि
सकलानि तदेव कर्म सा बुद्धिरप्रतिहता वचनं तदेव॥ अर्थोष्मणा विरहितः पुरुषः स एव त्वन्यः क्षणेन भवतीति
विचित्रमेतत्॥ ४०॥ यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः॥ स एव वक्ता स च दर्शनीयः स
र्वे गुणाः काञ्चनमाश्रयन्ति॥ ४१॥

स्य हानिर्भवतु। परं तु नः अस्माकं केवलं मुख्यः अर्थः द्रव्यं अस्तु किमर्थं येन एके
न अर्थेन विना पूर्वोक्ता गुणास्तृणलवप्राया भवन्ति॥ ३९॥ सामर्थ्ये सति यानि पूर्वेन्द्रियाणि तान्येव सन्ति। तदेव कर्म बु
द्धिरपि सा एव अप्रतिहता नाशं न प्राप्ता। वचनमपि तदेव वक्तृशक्तिः एवं सर्वं यथापूर्वमस्ति परं तु एकः अर्थः द्रव्यं गतम्। प
श्चादर्थस्य ऊष्माणेन विरहितः स एव पुरुषः अन्यः क्षणेन भवतीति एतद्विचित्रम् आश्चर्यम्॥ ४०॥ ४१॥ अस्य स्पष्टोऽर्थः॥

न० त०
१९

४३।४४।स्पष्टार्थः।परिक्षीणोति।कश्चित्पुरुषःक्षीणःसन्यवानांप्रसृतयेतुष्टायस्पृहयति।स्पृहांकरोति।सएवपश्चा
दग्रेलक्ष्म्यासंपूर्णःसन्इमांधरित्रींतृणसमांगणयति।अतःधनिनांअनैकान्त्यादेकस्थितेरभावादवस्थाअर्थेषु
प्रयोजनेषुगुरुलघुतयावस्तुनिश्चयतिसंकोचयतिच।यदाकालेनअवस्थायाःगुरुत्वंभवतितदागुरुत्वमेवे(
दौर्मन्त्र्यान्नृपतिर्विनश्यतियतिःसंगात्सुतोलालनाद्विप्रोनध्ययनात्कुलंकुतनयाच्छीलंखलोपासनात्।
ह्रीर्मद्यादनवेक्षणादपिकृषिःस्नेहःप्रवासाश्रयान्मैत्रीचाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम्।४२।दानं
भोगोनाशस्तिस्रोगतयोभवन्तिवित्तस्य।।योनददातिनभुंक्तेतस्यतृतीयागतिर्भवति।४३।मणिःशाणोल्ली
ढःसमरविजयीहेतिनिहतोमदक्षीणोनागःशरदिसरितःश्यानपुलिनाः।।कलाशेषश्चन्द्रःसुरतमृदिताबा
लललनातनिम्नाशोभन्तेगलितविभवाश्चार्थिषुजनाः।४४।परिक्षीणःकश्चित्स्पृहयतियवानांप्रसृतयेस
पश्चात्संपूर्णोकलयतिधरित्रींतृणसमाम्।अतश्चानैकान्त्याद्गुरुलघुतयार्थेषुधनिनामवस्थावस्तूनिप्रथय
तिचसंकोचयतिच।४५।राजन्दुधुक्षसियदिक्षितिधेनुमेनांतेनाद्यवत्समिवलोकममुंपुषाण।तस्मिंश्चसम्यगनि
शंपरितुष्यमाणेनानाफलैःफलतिकल्पलतेवभूमिः।।४६।। च्छति।यदालघुत्वमेवाङ्गीकरोतिकालपरत्वेनअ
वस्थानेदोषोभवति।४५।हेराजन्यदिह्येनांक्षितिधेनुंदुधुक्षसिदोग्धुमिच्छसि।तेनकारणेनअद्यअधुनाइमंप्रजालोकंव
त्समिवपुषाणपोषय।तस्मिन्लोकवत्सेसम्यक्परिपोष्यमाणेसतितदाइयंभूमिःकल्पलतेवअनिशंसर्वकालंनानाफ( ९

कुत्रचिदव्ययंसर्वत्रनकर्तव्यं।कुत्रचित्सत्यासत्यत्वेनअनृताअनृतत्वेनपरुषाकठिनाप्रियेनमृदुवादिनीमृदुभाषणेनहिंस्राहिं
स्रापादयालुःकृपालुत्वेनअर्थपराअर्थग्रहणेनवदान्यादातृत्वेननित्यव्ययासम्यग्यच्छियमितंतद्देयमेव।प्रचुरंनित्यंधना
नामागमनाद्एवंनृपतेराज्ञःनीतिःकर्त्तव्यताअनेकरूपायथावाराङ्गनावेश्यानानावेशान्करोतिअनेकरूपान्॥४७॥

सत्यानृताचपरुषाप्रियवादिनीचहिंस्रादयालुरपिचार्थपरावदान्या॥नित्यव्ययाप्रचुरनित्यधनागमाचवेश्या
ङ्गनेवनृपनीतिरनेकरूपा॥४७॥आज्ञाकीर्तिःपालनंब्राह्मणानांदानंभोगोमित्रसंरक्षणंच॥येषा
मेतेषड्गुणानप्रवृत्ताःकोऽर्थस्तेषांपार्थिवोपाश्रयेण॥४८॥यद्धात्रानिजभालपट्टलिखितंस्तोकंमहद्वाधनं
तत्प्राप्नोतिमरुस्थलेऽपिनितरांमेरौततोनाधिकम्॥तद्धीरोभववित्तवत्सुकृपणांवृत्तिंवृथामाकृथाः॥कूपे
पश्यपयोनिधावपिघटोगृह्णातितुल्यंजलम्॥४९॥रेरेचातकसावधानमनसामित्रक्षणंश्रूयताम्अम्भोदाबह
वोहिसन्तिगगनेसर्वेऽपिनैतादृशाः॥केचिद्वृष्टिभिरार्द्रयन्तिवसुधांगर्जन्तिकेचिद्वृथायंयंपश्यसितस्यतस्यपुर
तोमाब्रूहिदीनंवचः॥५०॥त्वमेवचातकाधारइतिकेषांनगोचरः॥किमम्भोदवरास्माकंकार्पण्योक्तिंप्रती
क्षसे॥५१

४८॥धात्राब्रह्मणायत्निजेस्वकीयभालपट्टेस्तोकमल्पंमहद्वाधनंलिखितम्।तदेवपुरुषःमरु
स्थलेऽपिवारिदेशेमेरौचसुवर्णाद्रौनितरांनिश्चयेनप्राप्नोतिअतस्त्वंधीरोभववित्तवत्सुद्रव्याढ्येषुकृपणांदीनांवृत्तिं
वर्त्तनंजीवनंवावृथामाकृथाःमाकुरु।अत्रदृष्टान्तम्पश्य।कूपेअथवापयोनिधौसमुद्रेघटःतुल्यंयावत्प्रमाणंजलंगृह्णा

०.१२० अथदुर्जनदूषणमाह॥५३॥५४॥उभयोरस्पष्टार्थः॥गुणिनांगुणाः यः दुर्जनैर्नअंकितः ननिन्दितः सकोनामभवेत्ना
१० स्येवतत्कथम्।ह्रीमतिलज्जावतिपुरुषेजाड्यंमौर्ख्यंस्थापयन्ति।व्रतरुचौमुमुक्षुत्वधारणेदंभः गण्यते।शुचौ
शुचि मत्तायांकैतवंप्रतारणम्।शूरेनिर्घृणतानिर्दयत्वम्।मुनौमौनेविमतिताप्रज्ञाराहित्यंवक्तुंनजानाति

अकरुणत्वमकारणविग्रहःपरधनेपरयोषितिचस्पृहा॥सुजनबन्धुजनेष्वसहिष्णुताप्रकृतिसिद्धमि
दंहिदुरात्मनाम्॥५२॥दुर्जनःपरिहर्तव्योविद्ययालंकृतोपिसन्मणिनाभूषितःसर्पःकिमसौनभयंक
रः॥५३॥जाड्यंह्रीमतिगण्यतेव्रतरुचौदंभःशुचौकैतवंशूरेनिर्घृणतामुनौविमतितादैन्यंप्रियालापि
नि॥तेजस्विन्यवलिप्ततामुखरतावक्तर्यशक्तिःस्थिरेतत्कोनामगुणोभवेत्सगुणिनांयोदुर्जनैर्नांकितः
॥५४॥लोभश्चेदगुणेनकिंपिशुनतायद्यस्तिकिंपातकैःसत्यंचेत्तपसाचकिंशुचिमनोयद्यस्तितीर्थेनकिं।
म्।सौजन्यंयदिकिंजनैःसुमहिमायद्यस्तिकिंमण्डनैःसद्विद्यायदिकिंधनैरपयशोयद्यस्तिकिंमृत्यु
ना॥५५॥शशीदिवसधूसरोगलितयौवनाकामिनीसरोविगतवारिजंमुखमनक्षरंस्वाकृतेःप्रभुर्धनप
रायणःसततदुर्गतःसज्जनोनृपाङ्गणगतःखलोमनसिसप्तशल्यानिमे॥५६॥ प्रियालापिनिप्रियवक्तरि
दैन्यंदारिद्र्यम्।तेजस्विन्यवलिप्ततागर्वः।वक्तरिमुखरतावाचालता।स्थिरेपुरुषेअशक्तिःएवंसर्वेष्वपिगुणेषु
दोषारोपोदुर्जनैःक्रियते।एवंदुर्जनैर्नांकितःननिन्दितःइत्थंगुणोनास्ति॥५४॥५५॥५६॥उभयोरस्पष्टोर्थः॥ १०

प० १०

चण्डकोपानामुग्राणांनृपाणांराज्ञांकश्चिदात्मीयःप्रियःश्रेष्ठोनभवति।यथापावकोऽग्निःहोतारंहोमकर्त्तारमपि
जुह्वानंहोमसमयेपिस्पृष्टःसन्दहति।५७।यदासेवकेनमौनंधार्यतेतदामूकःप्रवचनपटुश्चेत्वातुलःवाचालःअथ
वाजल्पकः।यदिकिंचिद्वदति।पार्श्वेस्थितःसन्धृष्टः।दूरतोभवतितदाऽप्रगल्भःअज्ञता।क्षान्तिक्षमाधृताचेत्भी
रुःभयभीतः।यदिनसहतेतदानाभिजातःमूर्खःअप्रयोजकः।एवंप्रायशःसेवाधर्मःपरमगहनःकठिनःयोगिना
मप्यगम्यःकर्त्तुमशक्यः।५८।नीचस्यक्षुद्रजनस्यगोचरगतैःसमीपवर्त्तिभिःपुरुषैःकैःसुखमास्यतेउपविश्यते।

नकश्चिच्चण्डकोपानामात्मीयोनामभूभुजाम्॥होतारमपिजुह्वानंस्पृष्टोदहतिपावकः॥५७॥मौ
नान्मूकःप्रवचनपटुर्वातुलोजल्पकोवाधृष्टःपार्श्वेभवतितदादूरतश्चाप्रगल्भः।क्षान्त्याभीरुर्य
दिनसहतेप्रायशोनाभिजातःसेवाधर्मःपरमगहनोयोगिनामप्यगम्यः।५८।उद्भासिताखिलख
लस्यविशृंखलस्यप्राक्जातविस्तृतनिजाधमकर्मवृत्तेः।दैवादवाप्तविभवस्यगुणद्विषोस्यनी
चस्यगोचरगतैःसुखमास्यतेकैः।५९।आरम्भगुर्वीक्षयिणीक्रमेणलघ्वीपुरावृद्धिमतीचपश्चा
त्।दिनस्यपूर्वार्द्धपरार्द्धभिन्नाछायेवमैत्रीखलसज्जनानाम्॥६०॥

कथंभूतस्यनीचस्यउद्भासिताखिलखलस्यउद्भासिताःप्रकटीकृताःअखिलाःसमस्ताःखलायेनखलसंग्रकरी।
कृतमितिपुनःकथंप्राक्पूर्वंजातासाविस्तृतानिजात्मकीयाअधमकर्मणांवृत्तिर्येनएवंसतिदैवात्अदृष्टवशात्अवा
प्तःप्राप्तःविभवोयेन।पुनःकथंगुणान्सद्गुणान्द्वेष्टीतिगुणद्विट्तस्यगुणद्विषःएवंभूतस्यगुणस्यप्राप्तवैभवस्यसमी

पेकैरपिसुखेननैवउपवेष्टुंशक्यते।अथवासुखंप्राप्य
ते।५९।६०।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नं०श० ६२॥इतिदुर्जनप्रशंसा॥अथसुजनप्रशंसा॥६२।६५।एतेस्यशब्दार्थाः॥प्रदानंप्रकर्षेणयद्दत्तंतत्प्रच्छन्नमाच्छादितं।गृहमु
११ पागतस्यआगतस्यसंभ्र मविधिः आदरविधिः।प्रियंकृत्वामौनम्।अन्यस्यप्रियंकृत्वानवदति।सदसिसभायामुपकृ

मृगमीनसज्जनानांतृणजलसंतोषविहितवृत्तीनाम्।लुब्धकधीवरपिशुनानिष्कारणमेववैरिणोजगति॥
६१॥वाञ्छासज्जनसंगमेपरगुणेप्रीतिर्गुरौनम्रताविद्यायांव्यसनंस्वयोषितिरतिर्लोकापवादाद्भयम्॥भ
क्तिःशूलिनिशक्तिरात्मदमनेसंसर्गमुक्तिःखलेयेष्वेतेनिवसंतिनिर्मलगुणास्तेभ्योनरेभ्योनमः॥६२॥वि
पदिधैर्यमथाभ्युदयेक्षमासदसिवाक्पटुतायुधिविक्रमः॥यशसिचाभिरुचिर्व्यसनंश्रुतौप्रकृतिसि
द्धमिदंहिमहात्मनाम्॥६३॥करेश्लाघ्यस्त्यागःशिरसिगुरुपादप्रणयितामुखेसत्यावाणीविजयि
भुजयोर्वीर्यमतुलम्॥हृदिस्वच्छावृत्तिःश्रुतमधिगतैकव्रतफलंविनाप्यैश्वर्येणप्रकृतिमहतां
मण्डनमिदम्॥६४॥संपत्सुमहतांचित्तंभवत्युत्पलकोमलम्॥आपत्सुचमहाशैलशिलासंघा
तकर्कशम्॥६५॥प्रदानंप्रच्छन्नंगृहमुपगतेसंभ्रमविधिःप्रियंकृत्वामौनंसदसिकथनंचाप्युपकृतेः॥
अनुत्सेकोलक्ष्म्यांनिरभिभवसाराःपरकथाःसतांकेनोद्दिष्टंविषममसिधाराव्रतमिदम्॥६६॥

तेःपरेणएकःउपकारःकृतःतस्यकथनंकरोति॥लक्ष्म्यांसत्यामनुत्सेकःअगर्वः।परस्यसत्कथाः।निरवद्याः।सा
राःपरमार्थरूपाः।कर्तव्याः।इदंव्रतमसिधारावत्कठिनंसतांकेनोपदिष्टंनकेनापि।अयंसतांस्वाभाविकोगुणः।६६ ११

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकमेवजलंतत्संसर्गतः अनेकगुणंभवति॥तद्यथा॥संतप्तायसितप्तेलोहेसंस्थितं चेत्पयसोनामापिनज्ञायते॥अ
भावएव॥तदेवजलंनलिनीपत्रेस्थितंमुक्ताकारतयाराजते॥तदेवजलंस्वातीमहानक्षत्रेमेघात्सागरेपतितंशु
क्तिकामध्यगतंचेत्मुक्ताफलंजायते॥एवंप्रायेणबाहुल्यतः पुरुषउत्तममध्यमाधमगुणःसंसर्गतोजायते॥६७॥

संतप्तायसिसंस्थितस्यपयसोनामापिनज्ञायतेमुक्ताकारतयातदेवनलिनीपत्रस्थितंराजते।स्वा
त्यांसागरशुक्तिमध्यपतितंतन्मौक्तिकंजायतेप्रायेणाधममध्यमोत्तमगुणःसंवासतोजायते॥६७॥
यःप्रीणयेत्सुचरितैःपितरंसपुत्रोयद्भर्तुरेवहितमिच्छतितत्कलत्रम्॥तन्मित्रमापदिसुखेचसम
क्रियंयदेतत्त्रयंजगतिपुण्यकृतोलभन्ते॥६८॥नम्रत्वेनोन्नमन्तःपरगुणकथनैःस्वान्गुणान्ख्या
पयन्तःस्वार्थान्संपादयन्तोविततप्रियतरारम्भयत्नाःपरार्थे॥क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान्
दुर्मुखान्दूषयन्तःसन्तःसाश्चर्यचर्याजगतिबहुमताःकस्यनाभ्यर्चनीयाः॥६९॥ अस्यस्पष्टोर्थः॥६८॥

नम्रत्वेनोन्नमन्तःउच्चाःमान्याभवन्ति।स्वान्स्वकीयान्गुणान्परेषांगुणानांकथनैःसङ्ख्यापयन्तःकथयन्तः।
स्वान्गुणान्स्वयंनवदन्ति।परेषांगुणानुवादोयैःक्रियतेतैरेवप्रसंगेनएतेषांगुणानुवर्णनंक्रियतेइति।कृत्वा
स्वार्थान्संपादयन्तः॥परस्यार्थेविततविस्तृताःपृथवःमहान्तआरम्भाःकर्माणियेषांतान्दुर्जनान्क्षान्त्यैवक्ष
मयाएवदूषयन्तःएवंसन्तःआश्चर्येणमहचर्याःश्रेष्ठाःजगतिबहुमताःमान्याःकस्यनअभ्यर्चनीयाःपूज्यानभव

भर्तृ॰ नी॰ सं॰ टी॰ २१

For Private and Personal Use Only

न० श० १२

इतिसुजनप्रशंसा।अथपरोपकारप्रशंसा॥७०॥७१॥अनयोःस्पष्टोर्थः।पद्माकरंसूर्यविकासिकमलानांसमुदायंदिन
करोविकचंविकसितंकरोति।तथैवचन्द्रोरात्रिविकासिकैरवचक्रवालम्।कुमुदसमुदायंविकसितंकरोति।ए
वंजलधरोमेघःनप्रार्थितःसन्जलंददाति॥किमर्थंकुर्वन्ति।तर्हिसन्तःस्वयंपरहितेषुकृताभियोगाः॥अभ्रा।

भवन्तिनम्रास्तरवःफलोदयेनवाम्बुभिर्भूरिविलम्बिनोघनाः।अनुद्धताःसत्पुरुषाःसमृद्धिभिःस्वभा
वएवैषपरोपकारिणाम्॥७०॥श्रोत्रंश्रुतेनैवनकुण्डलेनदानेनपाणिर्नतुकङ्कणेन।विभातिकायः
करुणापराणांपरोपकारैर्नतुचन्दनेन॥७१॥पद्माकरंदिनकरोविकचीकरोतिचन्द्रोविकासयतिकै
रवचक्रवालम्।नाभ्यर्थितोजलधरोपिजलंददातिसंतःस्वयंपरहिताभिहिताभियोगाः॥७२॥एकेसत्पु
रुषाःपरार्थघटकाःस्वार्थंपरित्यज्ययेसामान्यास्तुपरार्थमुद्यमभृतःस्वार्थाविरोधेनये।तेमीमानुष
राक्षसाःपरहितंस्वार्थायनिघ्नन्तियेयेनिघ्नन्तिनिरर्थकंपरहितंतेकेनजानीमहे।७३।पापंनिवारयति
योजयतेहितायगुह्यंचगूहतिगुणान्प्रकटीकरोति।आपद्गतंचनजहातिजहातिकालेसन्मित्रलक्षण
मिदंप्रवदन्तिसन्तः॥७४॥ थिताःसन्तःस्वयमेवपरहितंकुर्वन्तितेषांस्वभावः॥७२॥स्वार्थंपरित्यज्यपरार्थघ
टकाःपरकार्यंकुर्वन्तितेसत्पुरुषाःस्वार्थस्याविरोधेनआदौस्वकार्यंकृत्वापरकार्यंकुर्वन्तितेसामान्याःमध्यमाः
येस्वार्थायपरहितंनिघ्नन्तितेअमीमानुषेषुराक्षसाःकनिष्ठाः॥इतिनिश्चयेनयेनिरर्थकंपरहितंनिघ्नन्तिनाशय। १२

ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे॥७३॥
[illegible]

पुरापूर्वंक्षीरेणदुग्धेनआत्मगतायउदकायअखिलाःसर्वेगुणाःहिनिश्चयेनदत्ताः।अतःउभयोर्मैत्रीजाता।तदनन्त
रंतेनपयसाउदकेनक्षीरेदुग्धेतापमवेक्ष्यदृष्ट्वाआत्मास्वदेहःकृशानौहुतः।दुग्धेतप्तेसत्यन्तर्गतंजलंज्वलति।तद
नन्तरंस्वमित्रेणजलेनमदर्थेआत्माकृशानौहुतः।तर्हिअहमपिपतिष्यामीतिबुध्वामित्रापदंदृष्ट्वातत्क्षीरंपावकं
गन्तुंउन्मनःउत्कंठितमभवत्।पुनरपितत्क्षीरंजलेनप्रोक्षितंसच्छाम्यतिएतद्युक्तमुचितम्।अतःसतांमैत्रीगु

क्षीरेणात्मगतोदकायहिगुणादत्ताःपुरातेखिलाःक्षीरेतापमवेक्ष्यतेनपयसास्वात्माकृशानौहुतः।
गन्तुंपावकमुन्मनस्तदभवद्दृष्ट्वातुमित्रापदंयुक्तंतेनजलेनशाम्यतिसतांमैत्रीपुनस्त्वीदृशी॥७५॥इ
तःस्वपितिकेशवःकुलमितस्तदीयद्विषामितश्चशरणार्थिनःशिखरिपत्त्रिणःशेरते।इतोपिवडवा
नलःसहसमस्तसंवर्तकैरहोविततमूर्जितंभरसहंचसिन्धोर्वपुः॥७६॥मनसिवचसिकायेपुण्य
पीयूषपूर्णास्त्रिभुवनमुपकारश्रेणिभिःप्रीणयन्तः।परगुणपरमाणून्पर्वतीकृत्यनित्यंनिजहृ
दिविकसन्तःसन्तिसन्तःकियन्तः॥७७॥ गुणस्तादृशएव।७५।अहोइत्याश्चर्येसिन्धोःसमुद्रस्यवपुःवि
ततंविस्तृतमूर्जितंमहत्भरसहंभारसहते।तत्कथम्।इतःएकतःकेशवःस्वपितिनिद्रांकरोति।इतःएकत
तःतदीयद्विषांकेशववैरिणांअसुराणांकुलंशेते।एकतःशरणागताःशिखरिणःपर्वताःपक्षिणश्चशेरते।ए
कतःसमस्तसंवर्तकैःसहवडवानलःशेते॥एवंविलक्षणरूपाःपरस्परंतेषांभारसहंवपुरितिआश्चर्यम्॥७६॥७७

नी॰ श॰ अनयोः स्पष्टोऽर्थः ॥७८॥ किं तेन हेमगिरिणा मेरुणा रजताद्रिणा हिमालयेन वा अस्य आश्रितास्तरवः तरव एव भवन्ति। मनुष्याः स्वल्पसत्त्वाः सुवर्णरौप्यरूपाः कृताः अतस्तैः किं प्रयोजनम्। तस्मान्मलयाद्रिं वयं मान्यं मन्यामहे यस्य

१२

तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान्॥ मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय स्वान्गुणान्कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां लक्षणम्।७८। किं तेन हेमगिरिणा रजताद्रिणा वा यत्राश्रिताश्च तरवस्तरवस्त एव। मन्यामहे मलयमेव यदाश्रयेण कङ्कोलनिम्बकटुजा अपि चन्दनानि।७९॥ रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिम्। सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीराः।८०। क्वचिद्भूमौ शय्या क्वचिदपि च पर्यङ्कशयनं क्वचिच्छाकाहारी क्वचिदपि च शाल्योदनरुचिः॥ क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्॥८१॥ ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः। अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्।८२। निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्। अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।८३।

आश्रिताः कङ्कोलनिम्बकटुजा वृक्षा अपि चन्दना स्युः चन्दनं न्येव सर्वं निरतिपरोपकारः।७९। अथ धैर्यप्रशंसा।८० १२

कश्चित्सर्पः गारुडिनाधृतः करण्डमध्ये निक्षेपितः तस्य स्थितिं वदति। कथंभूतस्य सर्पस्य। भग्नाशस्य अहमस्मान्मोक्षयि-
ष्ये इति आशा भग्ना यस्य। पुनः करण्डपीडिततनोः। पुनः क्षुधया म्लानेन्द्रियस्य। एवं जाते सति दैववशात् कश्चिदाखुस्त-
त्रागत्य तत्करण्डस्य विवरं छिद्रं कृत्वा नक्तं रात्रौ अन्तः प्रविष्टः सन् भोगिनो मुखे निपतितः पश्चात्तस्य आखोः पिशिते-

भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः। तृप्तस्त-
त्पिशितेन सत्वरमसौ तेनैव यातः पथा लोकाः पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम्॥८४॥ पतितोपि
कराघातैरुत्पतत्येव कन्दुकः। प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः॥८५॥ आलस्यं हि मनुष्याणां श-
रीरस्थो महान् रिपुः। नास्त्युद्यमसमो वन्धुः कुर्वाणो नावसीदति॥८६॥ छिन्नोपि रोहति तरुः क्षीणो-
प्युपचीयते पुनश्चन्द्रः। इति विमृशन्तः सन्तः संतप्यंते न ते विपदा॥८७॥ नेता यत्र बृहस्पतिः प्रहरणं वज्रं सु-
राः सैनिकाः स्वर्गो दुर्गमनुग्रहः किल हरेरैरावतो वारणः। इत्यैश्वर्यबलान्वितोपि बलिभिर्भग्नः परैः संग-
रे तद्व्यक्तं वरमेव दैवशरणं धिक् धिक् वृथा पौरुषम्॥८८॥ कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी। त-
थापि सुधिया भाव्यं सुविचार्यैव कुर्वता॥८९॥

नमांसेन स सर्पस्तृप्तः। तेनैव छिद्रमार्गेण बहिर्यातः॥ अतः॥
भो जनाः यूयं स्वस्थास्तिष्ठत दैवमदृष्टमेव नृणां वृद्धौ क्षये च कारणमस्ति॥ उद्योगं सजन्तु अदृष्टवशाद्यन्न विष्य-
ति तन्न विष्यति॥८४॥८५॥८६॥८७॥ इति धैर्यप्रशंसा॥ अथ दैवप्रशंसा॥८८॥८९॥ एतेषां स्पष्टार्थाः॥ः॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



९०।९१।अनयोः स्पष्टोर्थः।ब्रह्मातावत्प्रथमम् अशेषगुणाकरं सर्वगुणानामुत्पत्तिस्थानं भुवः अलङ्करणमलङ्कारं एतादृशं पुरुषरत्नं सृजति।तदपिपुरुषरत्नं क्षणभङ्गि करोति चेत् अहह इति खेदे कष्टं यथास्यात्तथा इयं विधेः ब्रह्मणः अपण्डितता अज्ञानम्।९२।९३।इति दैवप्रशंसा।अथ कर्मप्रशंसा।नमेति।देवान् इन्द्रादीन् वयं नमस्यामः नन्

खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलं गतः।तत्राप्यास्य महाफलेन पतता भग्नं सशब्दं शिरः प्रायो गच्छति यत्र भाग्यरहितस्तत्रापदां भाजनम्।९०।गजभुजङ्गमयोरपि बंधनं शशिदिवाकरयोर्ग्रहपीडनम्।मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः।९१।सृजति तावदशेषगुणाकरं पुरुषरत्नमलङ्करणं भुवः।तदपि तत्क्षणभङ्गि करोति चेदहह कष्टमपण्डितता विधेः।९२।पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं नोलूकोप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम्।धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणम्।यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः।९३।नमस्यामो देवान्ननु हत विधेस्तेपि वशगा विधिर्वन्द्यः सोपि प्रतिनियतकर्मैकफलदः।फलं कर्मायत्तं किममरगणैः किं च विधिना नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति॥९४॥

मस्कुर्मः तर्हि तेपि हत विधेर्वशगाः अदृष्टाधीनाः स्यात् क्रमेण फलं दातुमशक्ताः।अथ विधिर्वन्द्यः सोपि प्रतिनियतं तस्य एकस्य फलं ददाति न तु अन्यत्फलं दातुं शक्तः।फलं तावत्कर्मायत्तं कर्माधीनं यदि चेत् तर्हि अमरैः किं अहं



For Private and Personal Use Only

९५। अस्यार्थः। याः खलान् साधून् प्रकरोति। मूर्खान् विदुषः करोति। द्वेषिणो हितान् करोति। हालाहलं परोक्षममृतं प्रत्य-
क्षं करोति तां सत्क्रियां भगवतीमाराधय यदि वाञ्छितं फलं भोक्तुमिच्छसि। हे साधो विपुलेषु गुणेषु व्यसनैः प्रीतिभिः
आस्थां वृथा मा कृथाः सत्क्रियां विना केवलं गुणैर्न किंचित्फलम्॥ ९६॥ गुणवत् गुणैर्युतम्। अथवा अगुणवत् का-

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे विष्णुर्येन दशावतारगहने क्षिप्तो म-
हासंकटे। रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः सूर्यो भ्राम्यति नित्यमेव गगने
तस्मै नमः कर्मणे॥ ९५॥ याः साधूंश्च खलान् करोति विदुषो मूर्खान् हितान् द्वेषिणः प्रत्य-
क्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात्। तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं
वाञ्छितं हे साधो व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः॥ ९६॥ गुणवदगुणवद्वा
कुर्वता कार्यमादौ परिणतिरवधार्या यत्नतः पण्डितेन। अतिरभसकृतानां कर्म-
णामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः॥ ९७॥ यत्कुर्वता कर्तुमिच्छता प-
ण्डितेन विवेकिना आदौ पूर्वमेव यत्नतः। प्रयत्नात्तस्य कार्यस्य अकार्यस्य च परिणतिः प्रान्तः। अव-
धार्या विचारणीया॥ कर्तुं शक्यं प्रान्तः शुभ इति आदौ विचार्य कर्तव्यम्। अन्यथा अतिरभसानां आ-
रम्भत्वादेव कृतानां कर्मणां विपाकः प्रान्तः फलं आविपत्तेः मरणपर्यन्तं हृदयदाही शल्यतुल्यो भवति॥

न० त०
१५

मनुजो मनुष्यः इमां कर्मभूमिं प्राप्य अस्तपः स्वधर्मनिष्टां सत्क्रियां न चरति स मन्दभाग्यः स्वहितं न जानाति। अत्र दृष्टान्तः
यथा वैडूर्यमय्यां रत्नरचितां सुवर्णस्थालीं प्राप्य तस्यां तिलानां खलिं चन्दनकाष्ठैः पचति पाकं करोति। यथा च सु
वर्णलाङ्गलेन वसुधां पृथ्वीं विलिखति। भूमिं श्लक्ष्णां करोति। किमर्थम् अर्कतूलस्य हेतोः अर्कवृक्षाणां तूलार्थम्॥ य
था कर्पूरखंडान् कर्पूरशकलान् छित्वा तत्र समन्तात् कोद्रवाणां वृत्तिं भित्तिं कुरुते। तथा इमां कर्मभूमिं प्राप्य तपस्य

स्थाल्यां वैडूर्यमय्यां पचति तिलखलं चन्दनैरिन्धनैर्यः सौवर्णैर्लाङ्गलाग्रैः विलिखति वसुधाम् अर्कतूलस्य
हेतोः॥ छित्वा कर्पूरखण्डान् वृत्तिम् इह कुरुते कोद्रवाणां समन्तात् प्राप्य इमां कर्मभूमिं न चरति मनुजो यस्त
पो मन्दभाग्यः॥ ८८॥ नैवाकृतिः फलति नैव कुलं च शीलं विद्यापि नैव न च यत्नकृतापि सेवा॥ भाग्यानि
पूर्वतपसा खलु संचितानि काले फलन्ति पुरुषस्य यथैव वृक्षाः॥ ८९॥ मज्जत्वंभसि यातु मेरुशिखरं शत्रू
न्जयत्वाहवे वाणिज्यं कृषिसेवनादिसकलाः विद्याः कलाः शिक्षतु। आकाशं विपुलं प्रयातु खगवत्क
त्वा प्रयत्नो महान् नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः॥ ९०॥ त्यक्त्वा विषयभोगान् भुंक्ते॥ ८८॥ ८
९॥ स्पष्टः॥ अम्भसि मज्जतु॥ मेरुशिखरं यातु। युद्धे शत्रून् जयतु। वाणिज्य कृषि सेवनादि सकलाविद्याः कलाश्च शिक्षतु॥
अभ्यासं करोतु। विपुलं पृथुलं आकाशं यातु गच्छतु खगवत् पक्षिवत्। एतादृशं नानाविधं परं उत्कृष्टं प्रयत्नं कृत्वा
पि इह लोके कर्मवशतः यत् अभाव्यं तन्न भवति भवितव्यम् इच्छितं न भवति भवितव्यं भवत्येव भाव्यस्य नाशं कुतः प्रय

सिन्दूरप्रकरवृत्ति॥१०

मीमंवनमिति। यस्यनरस्यपूर्वंसुकृतंविपुलंपुष्कलंभवतितस्यभीमंवनंप्रधानंश्रेष्ठंपुरंनवति। सर्वैजनाद्रुर्जनाअपिसुज
ननांयान्ति। कृत्स्नासमथाभूःसन्तःउत्तमाःनिधयोरत्नानिचैतेःपूर्णाभवन्ति।२।इतिकर्भवत्रंसासमासप अथवत्यन्तरेः
श्लोकाः।लाभकःगुणिसंगमः।असुखंकिंमूर्खैःसहसंगतिः।हानिःकासमयच्युतिः।अस्मिन्समयेयत्कर्त्तव्यमेवतत
नकृतंसमयोगतःसचहानिः।निपुणताकायाधर्मतत्वेरतिः।।शूरःकःविजितेन्द्रियः।प्रियतमाकायाऽनुव्रता।धनं।
वनेरणेशत्रुजलाग्निमध्येमहार्णवेपर्वतसंकटेवा।।सुमंप्रमत्तंविषमस्थितंवारक्षन्तिपुण्यानिपुराकृता
नि॥१॥ भीमंवनंभवतितस्यपुरंप्रधानंसर्वोजनःसुजनतामुपयातितस्य। कृत्स्नाचभूर्भवतिसन्निधिः
रत्नपूर्णायस्यास्तिपूर्वसुकृतंविपुलंनरस्य॥२॥ कोलाभोगुणिसंगमःकिमसुखंप्राज्ञेतरैःसंगतिः
काहानिःसमयेच्युतिर्निपुणताकाधर्मतत्वेरतिः।।कःशूरोविजितेन्द्रियःप्रियतमाकानुव्रताकिंध
नंविद्याकिंसुखमप्रवासगमनंराज्यंकिमाज्ञाफलम्॥३॥ मालतीकुसुमस्येवद्वेगतीचमनस्विनः
मूर्ध्निवासर्वलोकस्यशीर्यतेवनएववा।४।अप्रियवचनदरिद्रैःप्रियवचनाढ्यैःस्वदारपरितुष्टैःपरपरि
वादनिवृत्तैःक्वचित्क्वचितमण्डितावसुधा।५। किंविद्यासुखंकिंअप्रवासः।।राज्यंकिंआज्ञाफलंयस्याज्ञया।
सर्वंशुभाशुभंभवतिसामर्थ्यंतदेवराज्यम्।३।४।अप्रियवचनेषुदरिद्रास्तेः।प्रियवचनेषुआढ्याःसंपन्नास्तेः।स्वदारे
षुपरितुष्टेः।परापवादनिन्दायाःनिवृत्तैः।एवमादिभिर्गुणैर्युक्तैःपुरुषैःक्वचितक्वचितस्थलेवसुधामण्डिताशोभा

रत्नमालावृत्ति॥५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कदर्थितस्य कष्टं प्राप्तस्य धैर्यं वृत्तिर्वर्त्तनं यस्य तस्य धैर्यगुणः क्षमाष्टुं नाशं प्रापयितुं केनापि न शक्यते। अत्र दृष्टान्तः
अधोमुखकृतस्य वह्नेः शिखा कदाचिदपि अधो न याति॥८॥ लज्जेति। सत्यमेव व्रतं तदेव व्यसनं येषां ते प्रतिज्ञां

कदर्थितस्यापि च धैर्यवृत्तेर्न शक्यते धैर्यगुणं प्रमाष्टुम्॥ अधोमुखस्यापि कृतस्य वह्नेः नाधः शि
खा याति कदाचिदेव॥ कान्ताकटाक्षविशिखा न दहन्ति यस्य चित्तं न निर्दहति कोपकृतानुता
पः॥ कर्षन्ति भूरिविषयाश्च न लोभपाशैर्लोकत्रयं जयति कृत्स्नमिदं स धीरः॥७॥ एकेनापि
हि शूरेण पादाक्रान्तं महीतलम्॥ क्रियते भास्करस्येव स्फारस्फुरिततेजसा॥८॥ वह्निस्तस्य
जलायते जलनिधिः कुल्यायते तत्क्षणात् मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गा
यते॥ व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते॥ यस्याङ्गेऽखिललोकवल्लभतमं
शीलं समुन्मीलति॥९॥ लज्जागुणौघजननीं जननीमिव स्वामत्यन्तशुद्धहृदयामनुवर्त्तमा
नाम्॥ तेजस्विनः सुखमसूनपि संत्यजन्ति सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम्॥ ११०॥

न त्यजन्ति। पुनरन्यां न कुर्वंति। कथंभूतां प्रतिज्ञां॥ लज्जायाः ये गुणास्तेषामोघः समुदायस्तस्य जननीं॥ पु
नः कथंभूतां॥ स्वां स्वकीयां जननीमिव अत्यन्तशुद्धहृदयामनुवर्त्तमानामनुवर्त्तत इति या। अतस्तेजस्विनः
सुखमसून् प्राणानपि त्यजन्तीत्यर्थः॥११०॥ इति श्रीभर्तृहरिविरचितं सटीकं नीतिशतकं समाप्तम्॥ ॥ १६

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥श्रीगणेशायनमः॥अथश्टङ्गारशतंनामापरंतुसम्यग्विचारितंचेत्परिणामेवैराग्यमेवास्ति।निन्दास्तु
तिस्तुतिनिन्दावाद्भिःप्रकारोस्ति।अत्रतावत्स्तुतिनिन्दाप्रकारः।स्त्रीणांश्टङ्गारश्चभोगश्चनश्वरः।एतयोःसका
शात्यत्सुखंतन्नश्वरंपरिणामेदुःखमेव।एवंसतिविषयिभिःकामिभिःअविचार्यवङ्कतरंस्तूयते॥सास्तुतिरादौ
विलिखति।श्लोकःशम्भ्वेति।शम्भुःशिवःस्वयम्भूर्ब्रह्माहरिर्विष्णुःएतेमहान्तःईश्वराःयेनमदनेनसततंनिरन्त

शम्भुस्वयम्भुहरयोहरिणेक्षणानांयेनाक्रियन्तसततंगृहकर्मदासाः॥वाचामगोचरचरित्रविचि
त्रितायतस्मैनमोभगवतेकुसुमायुधाय॥१॥स्मितेनभावेनचलज्जयाभियापराङ्मुखैरर्द्ध
कटाक्षवीक्षणैः॥वचोभिरीर्ष्याकलहेनलीलयासमस्तभावैःखलुवन्धनंस्त्रियः॥२॥ ॥

रंगृहकर्मदासाःकृताःतस्मैकुसुमायुधायनमोस्तु॥कथंभूताय॥वाचामगोचराणिचरित्राणितैर्विचित्रि
ताय॥नानाप्रकाराय॥तत्रादौस्त्रीप्रशंसा॥१॥स्मितेनहास्येनभावेनचित्ताभिप्रायेणलज्जयाभियाभयेन
पराङ्मुखैः॥रर्द्धनिकटाक्षेणवीक्षितानिनेत्राणितैः।वचोभिःपरोत्कर्षासहिष्णुताईर्ष्यातयाईर्ष्यया॥क
लहेनलीलयाचरणभिःसमस्तभावैःखलुनिश्चयेनस्त्रियःवन्धनंभवन्ति॥२॥ ॥ ॥

भ्रूचातुर्य्येनआकुञ्चितानिअक्षीणिनेत्राणियेषुएवंभूताःकटाक्षाःस्निग्धाःस्नेहयुक्तावाचोलज्जयालज्जायुक्ता
हासाःलीलयास्वभावेनमन्दंशनैःप्रस्थितंप्रयाणंस्थितंच।स्त्रीणांएतेपदार्थाःभूषणमायुधंचभवति॥३॥भ्र
भ्रमसमागमोजातोयासांतानवोढास्तासांनवोढानांवदनान्येवकमलानितैः॥नेत्रचलितैःनेत्राणिचलिता
निचञ्चलानियेषुतैःस्फुरन्नीलालीनांप्रकरःसमुदायस्तेनपरिपूर्णाइवदृश्योभवन्ति।वदनानिकमलानितैः

**भ्रूचातुर्य्यात्कुञ्चिताक्षाःकटाक्षाःस्निग्धावाचोलज्जिताश्चैवहासाः॥लीलामन्दंप्रस्थितंच**
**स्थितंचस्त्रीणामेतद्भूषणंचायुधंच॥३॥क्वचित्सुभ्रूभङ्गैःक्वचिदपिचलज्जापरिणतैः॥क्व**
**चिद्भीतित्रस्तैःक्वचिदपिचलीलाविलसितैः।नवोढानामेभिर्वदनकमलैर्नेत्रचलितैःस्फुर**
**न्नीलालीनांप्रकरपरिपूर्णाइवदिशः॥४॥कुङ्कुमपंककलङ्कितदेहागौरपयोधरकम्पि**
**तहारा॥नूपुरहंसरणत्पदपद्माकंनवशीकुरुतेभुविरामा॥५॥ ॥ ॥**

भुनेत्रचलितानितएवभ्रमरास्तैःपूर्णानिदृश्यन्तेकथंभूतैर्वदनैःक्वचित्सुभ्रूभङ्गैःभ्रुवोभङ्गाश्चलनानियेषु
तैःक्वचित्लज्जयाविलसितैःशोभितैःवदनैः॥४॥कुङ्कुमस्यपङ्कःकर्दमःतेनकलङ्कितःदेहोयस्यां
सागौरौचतौपयोधरौस्तनौताभ्यांकम्पितःहारोयस्यांसा॥नूपुराण्येवहंसास्तैरणन्तिमञ्जाष्टान्येवपदानिय
स्यांसा॥एवंभूतारामारमयतीतिरामास्त्रीभुविकंपुरुषंवशीनकुरुतेकरोत्येवेत्यर्थः॥५॥ ॥ ॥ १७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वक्त्रं चन्द्रविकासि चन्द्रवत् वर्तुलं शोभायमानं पङ्कजानां परिहासः विकसनं तद्वत् तत्तमे लोचने॥ वर्णः कान्तिः स्वर्णं सुवर्णं अपाकरिष्णुः स्वर्णतोऽधिकः॥ कचानां केशानां चयः समुदायः अलिनीं भ्रमरीं जिष्णुः॥ जेता वक्षोजौ स्तनौ इभस्य गजस्य कुम्भः गण्डस्थलं तस्य संभ्रमः शोभा हरौ कठिनौ गुर्वी पृथुला नितम्बस्थली पश्चिमदेशं भार्द्दवं वाचां वचनानां हारि अत्यन्तं कोमलानि वचनानि एते पदार्थाः युवतिषु स्वाभाविकं स्वभावेनैव

वक्त्रं चन्द्रविकासि पङ्कजपरीहासक्षमे लोचने वर्णः स्वर्णमपाकरिष्णुरलिनीजिष्णुः कचानां चयः॥ वक्षोजाविभकुम्भसंभ्रमहरौ गुर्वी नितम्बस्थली वाचां हारि च मार्द्दवं युवतिषु स्वाभाविकं मण्डनम्॥६॥ स्मितं किंचिद्वक्त्रे सरलतरलो दृष्टिविभवः परिस्पन्दो वाचामभिनवविलासोक्तिसरसः॥ गतीनामारम्भः किसलयितलीलापरिकरः॥ स्पृशन्त्यास्तारुण्यं किमिह न हि रम्यं मृगदृशः॥७॥ ॥ ॥

मण्डनं भवन्ति॥६॥ तारुण्यं स्पृशन्त्याः मृगदृशः हरिणीदृशः किमपि किंचिदपि इह रम्यं न हि इति न रम्यमेवास्ति किं वक्त्रे किंचित् स्मितमल्पहास्यं सरलो ऋजुस्तरलश्चञ्चलः दृष्टेर्विभवः सामर्थ्यं विलासेन उक्तिः अभिनवा नूतना विलासोक्तिः तया सरसः मधुरः। वाचां वचनानां परिस्पन्दः वक्तव्यता। गतीनां गमनानामारम्भः। किसलयितः लीलापरिकरः किसलयाः नवपल्लवाः अत्यन्तं मृदवः। तद्वन्मृदुः शनैः मृदुगमनमित्यर्थः। रम्यम्। सुन्दरम्।७।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सत्हृदयैः आसक्तचित्तैः द्रष्टव्येषु किमुत्तमं द्रष्टव्यं मृगाक्षीणां प्रेमप्रसन्नं मुखम्। घ्रातव्येषु किमुत्तमं किं तदा॰
स्यपवनः श्राव्येषु किमुत्तमं तद्वचः। स्वाद्येषु किं तस्या ओष्ठपल्लवस्य रसः स्पृश्येषु किं तस्यास्तनुः ध्येयं किं तस्या नव॰
यौवनं सर्वत्र सर्वदा विभ्रमः विलासः स्मरणीयः॥८॥ एतास्तरुण्यः कटाक्षैः कस्य मनः विवशं स्वाधीनं न कुर्वन्ति॰
१४। १५। स्तनौ मांसग्रन्थी स्तो कनककलशौ इति उपमितौ उपमा दत्ता। मुखं श्लेष्मणः आगारं स्थानं तदपि शशाङ्के
न चन्द्रेण तुलितम्। स्रवतीति स्रवत् मूत्रेण क्लिन्नमेतादृशम्। जघनं तत् करिवराः गजश्रेष्ठाः तेषां करः शुण्डं तत्स्पर्धि
तेन उपमितम्। एवं स्त्रियः निन्द्यं रूपं तत्कविषु वराः श्रेष्ठास्तेष्वपि विशेषाः विशेषज्ञास्तैर्गुरुकृतमसत्यमेवोक्तम्
१६

For Private and Personal Use Only

ग०टी० यथा शलभः माहात्म्यमजानन्नमन्तीग्नावग्नौ पतति। तथा मीनोपि अज्ञानात् बडिशायुतं पिशितं मांसमश्नाति भुङ्क्ते। त
३६ थाएते वयं च जनाः विशेषेण जानन्तोपि विपदि जालं तस्य पटलात् समुदायात् न मुञ्चामः अहह इति खेदे अयं मोहस्य म
हिमा गहनः दुर्निवार्यः १७ तुङ्गं मुख्यं वेश्म गृहं सतां ज्ञातॄणां अभिमताः मान्याः सुताः संख्यातिगाः संख्याकर्तुं न शा
क्यते। एवं संपदः। दयिता स्त्री कल्याणी पतिव्रता वयः नवं नूतनं इति ज्ञाविनः अज्ञानेन मूढः मूर्खो जनः विश्वं सर्वं श्वो

अजानन्माहात्म्यं पतति शलभस्तीव्रदहने समीनोप्यज्ञानाद्बडिशायुतमश्नाति पिशितम्। विजानन्तोप्ये
ते वयमिह विपज्जालपटलान्न मुञ्चामः कामानहह गहनो मोहमहिमा। १७। तुङ्गं वेश्म सुताः सतामभिम
ताः संख्यातिगाः संपदः कल्याणी दयिता वयश्च नवमित्यज्ञानमूढो जनः। मत्वा विश्वमनश्वरं निविशा
ते संसारकारागृहे संदृश्य क्षणभङ्गुरं तदखिलं धन्यस्तु संन्यस्यति। १८। दीना दीनमुखैः सदैव शिशुभि
राकृष्टजीर्णाम्बरा क्रोशद्भिः क्षुधितैर्निरन्नविधुरा दृश्या न चेद्गेहिनी। याच्ञाभङ्गभयेन गद्गदगलत्त्रुट्यद्वि
लीनाक्षरं को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान्। १९। ऋमनश्वरं मत्वा संसारकारागृहे विशते प्रवेशा
ते धन्यस्तु ज्ञाता इदं सर्वं क्षणेन भङ्गुरं नश्वरं संदृश्य दृष्ट्वा अखिलं सर्वं संन्यस्यति संत्यजति। १८। अथ याच्ञादैन्यदूषणमाह
ः मनस्वी ज्ञाता स्वगेहिनी स्त्री निरन्नविधुरा अन्नाभावेन कष्टं प्राप्ता तथा च दीना दीनानि मुखानि येषां तैः क्षुधितैः शिशुकैः आप
त्यैः आकृष्टं जीर्णमम्बरं वस्त्रं यस्याः एतादृशी चेत् दृश्या न भवेत् न हि स्वकीयं जठरं दग्धं तस्यार्थे दे हीति वचनं वदेत् न वदेदि। ३६

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इयंजठरपिठरीदुःपूरादुःखेनपूरयितुमशक्याविडम्बनांकरोति।कथंभूतामभिमतःमान्यःमहामानःअभि
मानस्तस्यग्रन्थिःतस्याःप्रभेदेभेदनेपटीयसीशक्ता।पुनःअतिशयेनगुरुःगुरुतरःगुणानांग्रामःसमुदायःसए
वसूर्यविकासिअम्भोजंतस्यस्फुटाप्रकटाउज्वलादेदीप्यमानाचन्द्रिकायथाचन्द्रिकयासूर्यविकासिअ
म्भोजंम्लानतांयातीत्यर्थः।पुनःकथंविपुलामुक्ताविलसतीलज्जासैववल्लीतस्याविस्तारणकर्त्रीकुठारिका

अभिमतमहामानग्रन्थिप्रभेदपटीयसीगुरुतरगुणग्रामाम्भोजस्फुटोज्वलचन्द्रिका॥विपुल
विलसल्लज्जावल्लीवितानकुठारिकाजठरपिठरीदुःपूरेयंकरोतिविडम्बनाम्॥२०॥पुण्यग्रामेव
नेवामहतिसितपटच्छन्नपालीकपालीमादायन्यायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकण्ठम्
द्वारंद्वारंप्रविष्टोवरमुदरदरीपूरणायक्षुधार्तोमानीप्राणीसनाथोनपुनरनुदिनंतुल्यकुल्येषुदी
नः॥२१॥गङ्गातरङ्गकणशीकरशीतलानिविद्याधराध्युषितचारुशिलातलानि।स्थानानि
किंहिमवतःप्रलयंगतानियत्सावमानपरपिण्डरतामनुष्याः॥२२॥ २०॥यःप्राणीक्षुधार्तःमानीअभि

मानीउदरदरीपूरणायपुण्यग्रामेमहतिचवनेवा।सितःशुभ्रःपटःतेनछन्नःआच्छन्नापालीयस्याःतांकपाल
भिक्षापात्रंआदायगृहीत्वान्यायगर्भेयेषांद्विजानांकृतःहुतभुग्अग्निस्तस्यधूमेनधूम्रवर्णंद्वारंद्वारंप्रविष्टःभि
क्षांकरोतिसधन्यःवरंश्रेष्ठः।नतुयःतुल्यंसमानंकुलंयेषांतेषुदीनःसन्याच्ञांकरोतिसश्रेष्ठोनभवतिसकनिष्ठइत्यर्थः
२१।२२

For Private and Personal Use Only

भ०वै० कन्दाः कन्दरेभ्यः दरीभ्यः किं प्रलयं गता नाशं प्राप्ताः। अथवा गिरिभ्यः निर्झराः प्रध्वस्ताः किं। रसैः सह फलानि बिभ्र-
३१ तीति वृक्षाः किं रुग्णाः भग्नाः। तथा वल्कलिन्यश्च भग्नाः किं एवं सति पुरुषाः किमर्थं खलानां मुखानि वीक्ष्यन्ते। क-
थंभूतानां खलानां प्रसभमत्यन्तमपगतः प्रश्रयः नम्रता येषां ते। कथंभूतानि मुखानि। दुःखेन उपात्तं प्राप्तमल्पं वि-
त्तं तस्य स्मयः गर्वः स एव पवनः तस्य वशात् आ ईषत् नर्तिता भ्रूलता येषु तानि। २३। पुण्यैः मूलफलैः प्रियप्रणयिनीं

किं कन्दाः कन्दरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः प्रध्वस्ता वा तरुभ्यः सरसफलभृतो वल्क-
लिन्यश्च शाखाः॥ वीक्ष्यन्ते यन्मुखानि प्रसभमपगतप्रश्रयाणां खलानां दुःखोपात्ताल्पवित्तस्म-
यपवनवशान्नर्तितभ्रूलतानि। २३। पुण्यैर्मूलफलप्रियप्रणयिनीं प्रीतिं कुरुष्वाधुना भूशय्यां न-
ववल्कलैरकरुणैरुत्तिष्ठ यावो वनम्। क्षुद्राणामविवेकमूढमनसां यत्रेश्वराणां सदा वित्तव्याधिवि-
वेकव्याकुलगिरां नामापि न श्रूयते॥ २४॥ भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं माने दैन्य-
भयं बले रिपुभयं रूपे जराया भयम्। शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयं सर्वं वस्तु भया-
न्वितं भुवि नृणां वैराग्यमेवाभयम्। २५। इति कुरुष्व। अधुना भूशय्यां नवपल्लवैः अकरुणैः पुष्कलैः भूशय्यां कुरु-
ष्व। अधुना उत्तिष्ठ तत्र वनं यावः गच्छावः। तत्र किं यत्र यस्मिन् वने क्षुद्राणां अविवेकेन मूढं मनो येषां। सदा वित्तमेव
व्याधिस्तस्य विकारेण विह्वलाः गिरः येषां एवंभूतानामीश्वराणां समर्थानां नामापि न श्रूयते॥ २४॥ २५॥ स्पष्टः॥ ३१

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिवनंअखेदंखेदरहितंक्षितिरुहाणांवृक्षाणांफलंस्वेच्छालभ्यमस्ति।तथापुण्यसरितांस्थानेस्थानेपयःउदकंशि-
शिरंशीतलंमधुरंचवर्त्तते।सुललिताःलतानांपल्लवाःतैःप्रचुराशय्यामृदुस्पर्शाअस्ति।एवंसतिकृपणाःक्षुद्राःधनिनां
द्वारिकिमर्थंसंतापंसहन्तेतत्रनविद्मः॥२६॥अहंशिखरीपर्वतस्तस्यकुहरंबिलंतस्मिन्ग्रावशय्याशिलाशय्यात-
स्यांनिषण्णःउपविष्टःसन्ध्यानच्छेदेध्यानावसानेतेषांवासराणांदिवसानामन्तःस्फुरितंहसितंस्मरेयंस्मरणं

फलंस्वेच्छालभ्यंप्रतिवनमखेदंक्षितिरुहांपयःस्थानेस्थानेशिशिरमधुरंपुण्यसरिताम्।मृदुस्पर्शाश-
य्यासुललितलतापल्लवमयीसहन्तेसंतापंतदपिधनिनांद्वारिकृपणाः॥२६॥येवर्द्धन्तेधनपतिपुरःप्रा-
र्थनादुःखभाजोयेचाल्पत्वंदधतिविषयाक्षेपपर्यस्तबुद्धेः।तेषामन्तःस्फुरितहसितंवासराणांस्मरेयं
ध्यानच्छेदेशिखरिकुहरग्रावशय्यानिषण्णः॥२७॥भिक्षाहारमदैन्यमप्रतिहतंभीतिच्छिदंसर्वदादुर्मा-
त्सर्यमदाभिमानमथनंदुःखौघविध्वंसनम्।सर्वत्रान्वहमप्रयत्नसुलभंसाधुप्रियंपावनंशम्भोःसत्रमवा-
र्यमक्षयनिधिंशंसन्तियोगीश्वराः॥२८॥

करोमितेषांयेधनपतिपुरःअग्रेप्रार्थनादुःखंयैर्जनितंतस्यप्रार्थनादुःख-
भाजःवर्द्धन्तेवृद्धिंप्राप्ताःपुनःयेचविषयाणांआक्षेपाक्षेःपर्यस्ताःविस्तृताबुद्धिःतस्यअल्पत्वंदधति॥२७॥भिक्षायाआह-
रोयस्मिन्तत्रनविद्यतेदैन्यंयस्मिन्नकेनापिप्रतिहतंभीतिनयच्छेदकंसर्वदादुर्मात्सर्यमदस्याभिमानस्यएतेषांमथ-
नंनाशकंदुःखौघविध्वंसनंसर्वत्रअन्वहंप्रतिदिवसंअप्रयत्नेनसुलभंसाधूनांप्रियंपावनंअवार्यंनकेनापिवारितुंशक्यं

For Private and Personal Use Only

वै० २९।३०।३१। एते श्लोकाः स्पष्टार्थाः ॥ भोगाः मेघानां वितानं समुदायस्तन्मध्ये विलसन्ती सौदामिनी विद्युल्लतेव चञ्च
३८ ञ्चलाः आयुः आयुष्यं वायुना विघट्टिते अभ्रपटले अभ्राच्छिन्नं त्रुटितं अम्बु उदकं तद्वत् भङ्गुरं अस्थिरं।

आक्रान्तं मरणेन जन्म जरसा चात्युन्नतं यौवनं सन्तोषो धनलिप्सया शमसुखं प्रौढाङ्गनाविभ्रमैः
लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनैरस्थैर्येण विभूतयोऽप्युपहता ग्रस्तं न किं केन वा ॥२९॥
आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव व्यापदः ॥ जा
तं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसात्तत् किं केन निरङ्कुशेन विधिना यन्निर्मितं सुस्थि
रम् ॥३०॥ भोगास्तुङ्गतरङ्गभङ्गतरलाः प्राणाः क्षणध्वंसिनः स्तोकान्येव दिनानि यौवनसुख
स्फूर्तिः प्रियास्वस्थिरा ॥ तत्संसारमसारमेव निखिलं बुद्ध्वा बुधा बोधने लोकानुग्रहपेशलेन मनसा
यत्नः समाधीयताम् ॥३१॥ भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला आयुर्वायुविघट्टिता
भ्रपटलीलीनाम्बुवद्भङ्गुरम् ॥ लोला यौवनलालसास्तनुभृतामित्याकलय्य द्रुतं योगे धैर्यस
माधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः ॥ ३२॥ ॥ ॥

यौवने तारुण्ये लालसाः प्रीतिमन्तः तनुभृतः देहधारिणस्तेऽपि लोलाः चञ्चलाः एवं सर्वं मिथ्या असत्यमाक
लय्य ज्ञात्वा द्रुतं शीघ्रं योगे धैर्येण समाधिसिद्धिनैकायतानेन सुलभे भो बुधाः पण्डिताः बुद्धिं विदध्वं कुरुध्वम् ॥३२॥ ३८

आयुःकल्लोलस्तरङ्गस्तद्वत्लोलंचञ्चलम्॥यौवनश्रीःकतिपयदिवसस्थायिनी॥अर्थाःद्रव्याणिसंक
ल्पकल्पाःसंकल्पोयथाक्षणभङ्गुरस्तद्वत्भोगपूगाःभोगानांसमुदायाःघनसमयेतडिद्विद्युल्लतेवविभ्र
मोविलासोयेषांते।प्रियाभिःस्त्रीभिःप्रणीतंकृतंकण्ठेआश्लेषःआलिङ्गनंतदपिचचिरंचिरन्तनंनअतो
बुधाःयूयंब्रह्मणिआसक्तचित्ताःभवतभवस्यभयानांअम्भोधिःसमुद्रस्तस्यपारंप्रान्तंतरन्तु॥२३॥गर्भवा

आयुःकल्लोललोलंकतिपयदिवसस्थायिनीयौवनश्रीरर्थाःसंकल्पकल्पाघनसमयतडिद्विभ्र
माभोगपूगाः॥कण्ठाश्लेषोपगूढंतदपिचनचिरंयत्प्रियाभिःप्रणीतंब्रह्मण्यासक्तचित्ताभवतभ
वभयाम्भोधिपारंतरन्तु॥२३॥कृच्छ्रेणामेध्यमध्येनिपतिततनुभिःस्थीयतेगर्भवासेकान्ताविश्ले
षदुःखव्यतिकरविषमेयौवनेविप्रयोगः॥वामाक्षीणामवज्ञाविहसितवसतिर्वृद्धभावोप्यसा
धुःसंसारेरेमनुष्यावदतयदिसुखंस्वल्पमप्यस्तिकिंचित्॥२४॥ ॥ ॥

सेच्यमेध्यमध्येकृच्छ्रेणकष्टेनभवद्भिःनिपतितातनुर्येषांतैःस्थीयतेएवंबाल्येपियौवनेचकान्ता
याःविश्लेषस्यवियोगस्यदुःखस्यव्यतिकरेणविषमेवियोगःवार्द्धक्येवामाक्षीणांअवज्ञायाविशेषे
णहसितेनवसतिर्भवतिअतोवृद्धभावोपिअसाधुःअसमीचीनःएवंरेरेमनुष्याःसंसारेयदिस्वल्पम
पिसुखमस्तितर्हिवदन्तुब्रुवन्तु॥२४॥ ॥ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अ०वै० हेलोकाः बहुविधाः बहुप्रकाराः भोगाः भङ्गुराः वृत्तिर्वर्त्तनं येषां ते एवम्भूतास्सन्ति तैर्भोगैरेव च अयं भवः संसारो भवति॥
३९ तत् तस्मात् कारणात् चेष्टितं कृतम्। अथ च कस्मै कृते यूयं भ्रमत इदानीमस्माद्वचः वचनं यदि श्रद्धेयं भक्तिर्भविष्यति तर्हि
स्वधामभिन्नहारिणि कामानामभिलाषाणामुत्पत्तिर्यस्मिन् तत्वशं चेतः मनः समाधीयतां समाधानं क्रियतां। कथंभू
तं चेतः आशापाशएव पाशास्तेषां शतानि तेषां शमुपशान्तिः उपशमः तेन विशदं निर्मलम्॥३५॥ पुरुषः यस्मिन् बोधे स्थि

भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भवस्तत्कस्येह कृते परिभ्रमत हे लोकाः कृतं चेष्टितम्॥
आशापाशशतोपशान्तिविशदं चेतः समाधीयतां कामोत्पत्तिवशं स्वधामनि यदि श्रद्धेयमस्मद्वचः॥३५
ब्रह्मेन्द्रादिमरुद्गणांस्तृणगणान्यत्र स्थितो मन्यते यत्स्वादाद्विरसा भवन्ति विभवास्त्रैलोक्यराज्यादयः
बोधः कोपि स एक एव परमो नित्योदितो जृम्भते भो साधो क्षणभङ्गुरे तदितरे भोगे रतिं मा कृथाः॥३६
व्याघ्रीव तिष्ठति जरा परितर्जयन्ती रोगाश्च शत्रव इव प्रहरन्ति देहम्। आयुः परिस्रवति भिन्नघटादि
वाम्भो लोकास्तथाप्यहितमाचरतीति चित्रम्॥३७॥ तः मन् ब्रह्मा च इन्द्रश्च आदिर्येषां तान् मरुद्गणा
न् देवान् तृणतुल्यान् मन्यते॥ अथ च यस्य शापात् त्रैलोक्यराज्यादयोपि विभवः समृद्धयः विरसा भवन्ति॥ एवं
भूतो बोधः ज्ञानस्य परिपाकः स एक एव परमः उत्कृष्टः नित्य उदितः प्रकाशरूपः जृम्भते। शोभते। अतः भो साधो त
दितरे बोधात् इतरे क्षणभङ्गुरे भोगे रतिं प्रीतिं मा कृथाः मा कुरु॥३६॥ ३७॥ अस्य स्पष्टोर्थः॥ ॥ ॥ ३९

For Private and Personal Use Only

अथकालमहिमा।सारम्यानगरीतिसमहान्नृपतिःसामन्ताःसमीपवर्त्तिनःपरितोराजानस्तेषांचक्रंनत्पा
र्श्वेपार्श्वभागेसाविदग्धाचतुरापरिषत्सभाताश्चन्द्रविंबाननाःयुवतयःसचउन्मतश्चतेराजपुत्राश्चतेषांनिवह
ःतेवन्दिनःस्तुतिपाठकाःताउत्तमाःकथाःएतत्सर्वंयस्यवशात्कालवशात्स्मृतिपदमगात्स्मरणमात्रमुर्वरि

सारम्यानगरीमहान्सनृपतिःसामन्तचक्रंचतत्पार्श्वेतस्यचसाविदग्धपरिषत्ताश्चन्द्रवि
म्बाननाः॥उन्मत्तस्सचराजपुत्रनिवहस्तेवन्दिनस्ताःकथाःसर्वंयस्यवशादगात्स्मृतिपथं
कालायतस्मैनमः॥३८॥यत्रानेकःक्वचिदपिगृहेतत्रतिष्ठत्यथैकोयत्राप्येकस्तदनुवहव
स्तत्रनैकोपिचान्ते॥इत्थंचेमौरजनिदिवसौदोलयन्द्वाविवाक्षौकालःकाल्याभुवनफल
केक्रीडतिप्राणिशारैः।३९।आदित्यस्यगतागतैरहरहःसंक्षीयतेजीवितंव्यापारैर्बहुकार्य
भारगुरुभिःकालोपिनज्ञायते।दृष्ट्वाजन्मजराविपत्तिमरणंत्रासश्चनोत्पद्यतेपीत्वामोहमयीप्र
मादमदिरामुन्मत्तभूतंजगत्।४०। ॥

तंतस्मैकालायनमइत्यर्थः।३८।अथानन्तरंयत्रयस्मिन्गृहेअनेकोपिना
स्तितत्रक्वचिदपिएकस्तिष्ठतियत्रापिएक स्तदनुवहवोभवन्ति।तत्रअन्तेएकोपिनेषइत्थंचइमौरजनिदिवसौअक्षौ
इवदोलयन्कालःकाल्याकालिकयासहभुवनमेवफलकेपटेप्राणिशारैःयेप्राणिनस्तएवशारिकाशारिभिःक्रीडति

भ०वै० रात्रिःसाएवपुनर्दिवसःसएवइतिमत्वाजन्तवःप्राणिनःउद्यमिनःमुधावृथाधावन्ति।तथैवनिभृताःविघताःप्रार
५८ ब्धास्ताःक्रियाख्यैः।पुनरुक्तैर्भुक्तविषयैःव्यापारैःएवंविधेनप्रकारेणअमुनासंसारेणकदर्थीकृताःकष्टीकृ
ताःअहोइतिआश्चर्येवयंकथंनलज्जामहे॥४१॥४२॥४३॥वयंयेभ्योजाताउत्पन्नास्तेचिरकालंखलुनि

रात्रिःसैवपुनःसएवदिवसोमत्वामुधाजन्तवोधावन्त्युद्यमिनस्तथैवनिभृतप्रारब्धतत्तत्क्रियाः॥
व्यापारैःपुनरुक्तभुक्तविषयैरित्थंविधेनामुनासंसारेणकदर्थितावयमहोमोहंनजानीमहे।४१।नध्या
तंपदमीश्वरस्यविधिवत्संसारविच्छित्तयेस्वर्गद्वारकपाटपाटनपटुर्धर्मोपिनोपार्जितः॥नारीपीन
पयोधरोरुयुगलंस्वप्नेपिनालिङ्गितंमातुःकेवलमेवयौवनवनच्छेदेकुठारावयम्।४२।नाभ्यस्ता
भुविवादिवृन्ददमनीविद्याविनीतोचिताःखड्गाग्रैःकरिकुम्भपीठदमनैर्नाकंननीतंयशः।कान्ता
कोमलपल्लवाधररसःपीतोनचन्द्रोदयेतारुण्यंगतमेवनिष्फलमहोशून्यालयेदीपवत्।४३॥
वयंयेभ्योजाताश्चिरपरिगताएवखलुतेसमंयैःसंवृद्धाःस्मृतिविषयतांतेपिगमिताः।इदानीमेतेस्मःप्र
तिदिवसमासन्नपतनागतास्तुल्यावस्थांसिकतिलनदीतीरतरुभिः॥४४॥ ॥ ॥

श्चयेनपरिगताः॥इदानीमेतेवर्तमानेतेपिवयंप्रतिदिवसंदिनंदिनंप्रतिआपन्नपतनाःआपन्नंप्राप्तंसमीपेप
तनंयेस्ते॥अत्रइयमवस्थासिकतेनदीतीरेतरुभिःसदृशी॥४४॥ ॥श्री॥ ॥ ॥श्री॥ ॥ ५८

४५॥ आयुः नृणां वर्षशतं नियमितं परिमितं रात्रौ तस्य शतस्य निद्रया रात्र्यनेन अर्द्धं निरर्थकं गतम्। अवशिष्टं पञ्चा
शद्वर्षं तस्मिन् बाल्ये सार्द्धद्वादशवर्षं वृद्धत्वे सार्द्धद्वादशवर्षं अनुपयुक्तं गतम्। पश्चात् तारुण्यं पञ्चविंशतिवर्षं अव
शिष्टं वर्द्धितं तदपि व्याधिना प्रियाणां वियोगेन च यः दुःखं तेन सहितं तत्तथैव उदरपोषणार्थं सेवादिभिः आदि
विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितं शुश्रूषापि समाहितेन मनसा पित्रोर्न संपादिता
आलोलायतलोचना युवतयः स्वप्नेपि नालिङ्गिताः कालोयं परपिण्डलोलुपतया काकैरिव प्रे
षितः॥४५॥ आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्द्धं गतं तस्यार्द्धस्य परस्य चार्द्धमपरं बालत्ववृद्धत्वयोः
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणि
नाम्॥४६॥ क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः क्षणं वित्तैर्हीनः क्षणमपि च संपूर्ण
विभवः॥ जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनुः नरः संसारान्ते विशति यमधानीयवनि
काम्॥४७॥ शब्दाद्यान्निशादिभिर्नीयते। एवं सति जीवने वारिहृदकस्य तरङ्गवच्चञ्चले अस्थिरे प्राणि
नां सौख्यं कुतः नास्तीत्यर्थः॥४६॥ यथा नटः नाना वेषान् दधाति तथायं प्राणी क्षणं बालो भवति क्षणं का
मभोगे रसिकः युवा तरुणो भवति क्षणं वित्तैर्हीनः दरिद्रः क्षणमपि च परिपूर्णविभवः पश्चात् जरया जीर्णैः
अङ्गैः संसारान्ते मरणसमये यमधानीयवनिकां यमस्य राजधानीं पुरीमन्तःपटे विशति॥४७॥ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथयतिनृपतिसंवादः॥यतीसंन्यासीराजाचउभयोःसंवादः।तत्रादौयतीराजानंप्रतिवदति।त्वंराजाराज्याभिम
ानी।वयंयतयः उपासितोगुरुस्तस्यप्रज्ञाबुद्धयःतासामभिमानेनउन्नताः।पुनस्त्वंविभवैःसंपद्भिःख्यातःप्रसिद्धः।
नोस्माकंयशांसिकवयःकुशलाःदिक्षुचतुर्दिक्षुप्रतन्वन्तिविस्तारयन्ति।इत्थममुनाप्रकारेणआवयोःमानःध
नंचमानधनेताभ्यां।अन्तरमतिदूरंयदिअधुनात्वमस्मासुपराङ्मुखोसितर्हिवयमपित्वयिएकान्ततःनिःस्पृ

त्वंराजावयमप्युपासितगुरुप्रज्ञाभिमानोन्नताःख्यातस्त्वंविभवैर्यशांसिकवयोदिक्षुप्रतन्वन्ति
नः॥इत्थंमानधनातिदूरमुभयोरप्यावयोरन्तरंयद्यस्मासुपराङ्मुखोसिवयमप्येकान्ततोनिस्पृ
हाः॥४८॥अर्थानामीशिषेत्वंवयमपिचगिरामीश्महेयावदर्थंशूरस्त्वंवादिदर्पज्वरशमनविधा
वक्षयंपाटवंनः॥सेवन्तेत्वांधनाढ्यामतिमलहतयेमामपिश्रोतुकामामय्यप्यास्थानतेचेत्त्वर
यिममनितरामेवराजन्गतासीत्॥४९॥ प्रकारेणनिस्पृहाभवामः॥४८॥पुनर्यतिःराजानंप्रतिवदति।हेरा

जन्त्वंयावत्अर्थानामीशिषेईशःस्वामीतावत्वयमपिगिरांवाणीनांईश्महेईशाःस्वामिनः।त्वंशूरः।नःअस्माकं
वादिनांदर्पोहङ्कारस्तस्यज्वरस्तस्यशमनविधौपाटवं।शक्तिअक्षयावर्तते।त्वांधनाढ्याःसेवन्तेमामपिमतिःबु
द्धिस्तस्यामलःजाड्यंतस्यहतयेनाशायश्रोतुकामाःशास्त्राभ्यासंकर्तुकामाःसेवन्ते॥अधुनामय्यपितेआस्थानेवचे
त्तर्हिममापित्वयिसुतरामास्थानास्तीत्यर्थः॥४९॥ ॥ ॥ ४१

For Private and Personal Use Only

पुनरपियतीवदति।वयमिहवल्कलैःपरितुष्टाःत्वंदुकूलैःपट्टवस्त्रैःपरितुष्टः।परितोषःसंतोषःसमएवनिर्गतःवि
शेषोयस्मात्सनिर्विशेषः।एवंभूतोविशेषोजातः।अतस्तुइतिनिश्चयेनसचदरिद्रीभवतियस्यतृष्णाआशाविशा
लामहतीभवतिचइत्यनन्तरंमनसिचपरितुष्टेसतिकःअर्थवान्समर्थःकोदरिद्रीनकोपीत्यर्थः॥५०॥अशना
यभोजनायफलमलंपूर्णं।पानायस्वादुमधुरंतोयमलम्॥अवनिपृष्ठेशयनमलम्।वल्कलेचद्वेवाससीअलंए

वयमिहपरितुष्टावल्कलैस्त्वंदुकूलैःसमइहपरितोषोनिर्विशेषोविशेषः॥सतुभवतुदरिद्रीयस्य
तृष्णाविशालामनसिचपरितुष्टेकोर्थवान्कोदरिद्रः॥५१॥फलमलमशनायस्वादुपानायतोयं
शयनमवनिपृष्ठेवाससीवल्कलेच॥धनलवमधुपानभ्रान्तसर्वेन्द्रियाणामविनयमनुमन्तुंनो
त्सहेदुर्जनानाम्॥५२॥अशीमहिवयंभिक्षामाशावासोवसीमहि।शयीमहिमहीपृष्ठेकुर्वीमहि
किमीश्वरैः॥५३॥

वंसतांभोगनिष्पत्तिर्भवतिधनलवेनअल्पद्रव्येणतद्यामधुपानेनभ्रान्तानिसर्वाणिइन्द्रि
याणियेषांतेषांदुर्जनानामविनयंऔद्धत्यमनुमन्तुमनुमोदितुंनउत्सहेउत्साहोनभवति।५२।वयंभिक्षांभिक्षामन्न
माशीमहिभक्ष्यामः।आशादिशातदेववासःवस्त्रंवसीमहिपरिधानंकुर्मः॥महीपृष्ठेमहीतलेशयीमहिशय
नंकरिष्यामः॥एवंसतिईश्वरैःसमर्थैःकिमस्माकंप्रयोजनम्॥५३॥ ॥ ॥

वै०
४२

हे नृप तव संसदि सभायां वयं केपि न भवामः। न नटाः। न नर्त्तकाः। न विटाः। न गायकाः। बन्दिनः। न च सभ्येभ्यः इतरेषु
सभ्यास्तेषां वादेषु चुञ्चवः दक्षाः प्रौढाः। न वयं स्तनभारेण नमिताः नम्राः योषितः वेश्याः। एते उक्तास्ते तव सभायां न वशि
याः। एतेषां मध्ये वयं संन्यासिनः केन केपीत्यर्थः। अतस्तव वीतिः अस्मासु कथं न विघ्नती त्यर्थः।५३। विपुलानि हृद
वगाहानि हृदयानि येषां तैः ईशैः पुरा पूर्वं इदं जगत् जनितमुत्पादितम्। कैश्चिद् विधृतमपरैरीदृशमन्यैर्विजित्य युग्धं तृणं त

न नटा न विटा न गायका न च सभ्येतरवादचुञ्चवः। नृपमीक्षितुमत्र के वयं स्तनभारानमिता न योषितः
५३। विपुलहृदयैरीशैः कैश्चिज्जगज्जनितं पुरा विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा। इह हि भुवनान्य
न्ये धीराश्चतुर्दश भुञ्जन्ते कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः।५४। अभुक्तायां यस्यां क्षणमपि न या
तं नृपशतैर्भुवस्तस्या लाभे क इह बहुमानः क्षितिभृताम्। तदंशस्याप्यंशे तदवयवलेशेपि पतयो विषा
दे कर्त्तव्ये विदधति जडाः प्रत्युत मुदम्।५५। थायत्कृतम्। इह हि अधुना धीराश्चतुर्दश भुवनानि भुञ्जन्ते। एवं सति

पुंसां हि श्रीणां पुराणां स्वाम्ये स्वामित्वे एषः एतावान् मदज्वरः कः कुत्रत्यः।५४। यस्यां क्षणमपि अभुक्तायां नृपशतैः यातं
नृपैः पृथ्वी क्षणमपि न भुक्ता। तावन्नृपाणां शतैः यातं गतं नृपाणां शतानि यातानि गतानि एवमस्थिरत्वे सति तस्याः भु
वः लाभे क्षितिभुजां कः बहुमानः अहङ्कारः एते राजानः तदंशस्यापि अंशे पूर्वं भुक्तं तस्य अंशस्यापि अंशाः त
स्यापि अवयवे यतयः संतः जडाः मूर्खाः कर्त्तव्ये विषादे अपि च मुदं विदधति कुर्वीति एतदेवाश्चर्यम्।५५।। ।। ४२

अथ मनःसंबोधनं। हे हृदय त्वं परेषां चेतांसि प्रतिदिवसं बहुधा बहुप्रकारेण आराध्य किं प्रसादं प्रसन्नतां नेतुं प्रा
प्तुं किं विशसि प्रविशसि कथंभूतं प्रसादम्। क्लेशविफलं क्लेशैर्विफलं निष्फलम्।। उत त्वयि अंतःप्रसन्ने स्वयं प्रस
न्नतां प्राप्ते सति नव विविक्तः शुद्धः संकल्पः अभिलषितं मनोगतं किं न पुष्यति इह किं न प्राप्नोति। कथंभूते त्वयि उदि
नः चिंतामणेर्गुणो यस्मिन् तस्मिन्।।५६।। हे चित्त वृथा किं भ्रमसि क्वचन कुत्र चित विश्राम्यतां तव भ्रमणो

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा प्रसादं किं नेतुं विशसि हृदय क्लेशविफलम्।। प्रस
न्ने त्वय्यन्तःस्वयमुदितचिन्तामणिगुणे विविक्तःसंकल्पः किमभिलषितं पुष्यति न ते।।५६।।
परिभ्रमसि किं वृथा क्वचन चित्त विश्राम्यतां स्वयं भवति यद्यथा भवति तत्तथा नान्यथा।। अ
तीतमपि न स्मरन्नपि च भाव्यसंकल्पयन्नतर्कितगमागमाननुभवस्व भोगानिह।।५७।। ::

न्प्रयोजनं नास्ति।। यत् यथा स्वयं भवति तत् तथा न अन्यथा अतः कारणात् त्वं अतीतं पूर्वजातमपि न स्मर
न्।। अपि च भावी भविष्यं न संकल्पयन् अतर्कितान् आकस्मिकान् अवगमान् गतान् आगमान् आ
गतान् भोगान् इह अनुभव इति स्वयं यदृच्छया प्राप्तान्।।५७।। ।। ।। ।। ।।श्री कृष्णाय नमः

For Private and Personal Use Only

वै० हे चेतः एतस्मा दायासकादायासकृपादान्द्रियार्थानांवनाद्विरम विरामं प्राप्नुहि। श्रेयो मार्गं श्रेयसां पुण्यानां मा
४३ र्गमाश्रय मंगीकुरु षकथंभूतं मार्गंच्छिद्रेषाणां दुःखानां शमनस्य व्यापारे दक्षम्। एवं सति क्षणात् स्वस्व आ
त्मीयं भावस्वभावमुपेहि प्राप्नुहि निजां स्वकीयां कल्लोलवत्तरंगवत् लोलां चंचलां मतिं त्यज। भंगुरां अस्थि
रां भवस्य संसारस्य रतिं प्रीतिं भूयः पुनः मा भज। अधुना प्रसीद प्रसन्नं भव॥५८॥ हे चेतः मोहं मार्जयतां त्यजतां च

एतस्माद्विरमेन्द्रियार्थगहनादायासकादाश्रय श्रेयोमार्गमशेषदुःखशमनव्या
पारदक्षं क्षणात्॥ स्वस्थीभावमुपेहि संत्यज निजां कल्लोललोलां गतिं मा भूयो भज
भंगुरां भवरतिं चेतः प्रसीदाधुना॥५८॥ मोहं मार्जयतामुपाश्रय रतिं चन्द्रार्द्धचूडा
मणौ चेतः स्वर्गतरंगिणीतटभुवामासंगमंगीकुरु॥ को वा वीचिषु बुद्बुदेषु
च तडिल्लेखासु च श्रीषु च ज्वालाग्रेषु च पन्नगेषु च सरिद्वेगेषु च प्रत्ययः॥५९॥

न्द्रार्धचूडामणौ शंकरे रतिं प्रीतिमाश्रय स्वर्गतरंगिणी भागीरथी तस्यास्तटभूमिका नामासंगं वसतिं कु
रु इति कृत्वा तव सार्थकता भविष्यति वीचिषु तरंगेषु बुद्बुदेषु च तडिल्लेखासु च श्रीषु च ज्वालाग्रेषु च प(
न्नगेषु च सर्पेषु च सरिद्वेगेषु च इत्येवमादिषु च को वा प्रत्ययः सर्वे एते पदार्थाः चंचलाः अ स्थायिनः दुः॥
खदाश्च इति प्रत्ययः अनुभवोस्ति। लक्ष्म्यादि विषयाश्चञ्चला इत्यर्थः॥५९॥ ना॥ ॥ ४३

हे चेतः त्वमिमां रमां लक्ष्मीमास्थायिनीमास्थया आस्थां बुध्या सकृदेकवारं मा चिन्तय मा चिन्तनं कुरु कथंभूतां
मां भूपालानां राज्ञां भ्रुकुटीकुटीरः शाला तस्यां विहरव्यापारः नृत्यं तत्र पण्याङ्गना वेश्या सदृशा ॥ यथा यत्र यत्र राज्ञां
भ्रूकुटीनिर्देशः तत्र वेश्या नृत्यं करोति तथैव इयमपि ॥ अत एव तस्याः अस्माकमपेक्षा नास्ति । तर्हि किं कथय कञ्चु
किताः आच्छादिताः सन्तः वाराणसीरथ्यापङ्क्तिषु भवनद्वाराणि प्रविश्य पात्रे पतितां भिक्षां अपेक्षामहे अपे ।

चेतश्चिन्तय मा रमां सकृदिमामास्थायिनीमास्थया भूपालभ्रुकुटीकुटीरविहरव्यापा
रपण्याङ्गनां ॥ कन्थाकञ्चुकिताः प्रविश्य भवनद्वाराणि वाराणसीरथ्यापङ्क्तिषु पा
णिपात्रपतितां भिक्षामपेक्षामहे ॥६०॥ अग्रे गीतं सरसकवयः पार्श्वयोर्दाक्षिणात्याः
पश्चाल्लीलावलयरणितं चामरग्राहिणीनाम् ॥ यद्यस्त्येवं कुरु भवरसास्वादने लम्प
टत्वं नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥६१॥

क्षां कुर्महे ॥६०॥ अग्रे पुरः गीतं गायनं ।
सरसकवयः सरसोपमा निर्युक्तं कवित्वं कुर्वाणाः उभयपार्श्वयोः दाक्षिणात्याः सुंदराः स्त्रियः पृष्ठे चामरग्रा
हिणीनां अङ्गनानां लीलया वलयानां रणितं शब्दितं हे चेतः यदि भवरसस्य आस्वादने लम्पटत्वं अ
स्ति तर्हि एवमुक्तप्रकारेण कुरु । यदि एवमस्ति तर्हि तथैवास्तु अपेक्षा नास्ति तर्हि निर्विकल्पे समाधौ
चित्तैकाग्र्येण मद्दसा शीघ्रं विश प्रविशस्व ॥६१॥ ॥ ॥ ॥

वै० एभिःकृत्वाकिंप्रयोजनंभवबन्धान्मुक्तता नभवेदित्यर्थः॥६२॥भवेशाङ्करेभक्तिःहृदिस्थंजन्ममरणयोर्भयंबन
४४ धुपुत्रबन्ध्वादिषुस्नेहोनैवनचमन्मथात्जाताविकाराःभोगाख्यःसंसर्गदोषःतेनरहितःविजनेनिर्जनेवनेस्थितिः
एवंवैराग्यमस्तिचेत्तर्हिअतःपरंउत्कृष्टंकिमर्थनीयंप्रार्थनीयंनवैराग्यात्परंभाग्यंएवमस्ति॥६३॥तस्मात्हेचे

प्राप्ताःश्रियःसकलकामदुघास्ततःकिंन्यस्तंपदंशिरसिविद्विषतांततःकिम्॥संपादिताःप्रणयि
नोविभवास्ततःकिंकल्पस्थितास्तनुभृतांतनवस्ततःकिम्।६३॥भक्तिर्भवेमरणजन्मभयंहृदिस्थं
स्नेहोनबन्धुषुनमन्मथजाविकाराः॥संसर्गदोषरहिताविजनावनान्तावैराग्यमस्तिकिमतःपर
मर्थनीयम्॥६३॥तस्मादनन्तमजरंपरमाविकाशितद्ब्रह्मचिन्तयकिमेभिरसद्विकल्पैः॥यस्या
नुषङ्गिणइमेभुवनाधिपत्यभोगादयःकृपणलोकमताभवन्ति॥६४॥गात्रंसंकुचितंगतिर्विग
लिताभ्रष्टाचदन्तावलीदृष्टिर्नश्यतिवर्द्धतेबधिरतावक्त्रंचलालायते॥वाक्यंनाद्रियतेचबान्धव
जनैर्भार्यानशुश्रूषतेहाकष्टंपुरुषस्यजीर्णवयसःपुत्रोप्यमित्रायते॥६५॥तःअनन्तंअन्तोनास्तिअ

जरंजरानास्तिपरम्उत्कृष्टंविकाशिप्रकाशकमेतादृशंब्रह्मचिन्मयएभिर्विषयैःयत्असत्विनाशितस्यविकल्पै
र्भेदैःकिंकिमपिप्रयोजनंनास्तितत्किंब्रह्मयस्यानुषङ्गिणःस्वभावेनैवभुवनानामाधिपत्यंराज्यंतस्यभोगाः
भवन्ति।कथंभूताःभोगाःकृपणाःक्षुद्राःमायेलोकास्तेषांमताःमान्याःप्रियाः॥६४॥६५॥ ॥ ॥ ४४

हे मानस त्वं पातालमाविशसि प्रविशसि नभः आकाशं विलंघ्य यासि गच्छसि भ्रान्त्या चापलत्वेन चञ्चलत्वेन यद्विश्व
मण्डलं भ्रमसि परंतु न निर्वृत्तिं सुखं एषि प्राप्नोषि न ब्रह्म जातु एकवारं कदाचिदपि न स्मरसि स हि तं न जानासि न हि निर्वृ
त्तिं केन प्रकारेण एषि प्राप्नोषि ॥६६॥ वेदैः स्मृतिभिश्च पुराणैश्च महाविस्तरैः शास्त्रैः स्वर्गग्रामे कुटी पर्णकुटी तस्यां निवा
स फलदैः कर्मणां क्रियाणां विभ्रमैः विलासैश्च किं प्रयोजनं न किंचित् किं कृत्वा स्वात्मनः आनन्दस्य पदं स्थानं तस्मि

पातालमाविशसि यासि नभो विलङ्घ्य दिङ्मण्डलं भ्रमसि मानस चापलेन। भ्रान्त्यापि जातु विमलं क
थमात्मलीनं तद्ब्रह्म संस्मरसि निर्वृतिमेषि केन ॥६६॥ किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्त
रैः स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः। मुक्त्वैकं भवदुःखभाररचनाविध्वंसिकालान
लं स्वात्मानन्दपदप्रवेशकलनं शेषा वणिक्वृत्तयः ॥६७॥ वर्णं सितं वीक्ष्य शिरोरुहाणां स्थानं जरापरि
भवस्य तदेव पुंसाम्। आरोपितास्थिकलशं परिहृत्य यान्ति चाण्डालकूपमिव दूरतरं तरुण्यः ॥६८॥

प्रवेशस्तस्य कलनं ज्ञानं एकं मुक्त्वा त्यक्त्वा। कथंभूतं ज्ञानं। भवस्य संसारस्य दुःखानि तेषां भारः समुदायस्तस्य र
चनाया विध्वंसिकालानलं प्रलयाग्निं ज्ञानं विना शेषाणि उर्वरितानि तानि वणिजां वर्त्तनानि उद्यमाः तैः कृत्वा किं
६७। शिरोरुहाणां केशानां वर्णं सितं शुभ्रं तदेव पुंसां जरया पराभवस्य स्थानं एतादृशं स्वरूपं वीक्ष्य तरुण्यः दूरतरं
यान्ति। कमिव चाण्डालकूपमिव। अस्थिनां कलशा यस्मिन् तं परिहृत्य त्यक्त्वा यथा दूरतरं यान्ति गच्छन्ति। तथा।
६८

न० वै०
४५

यावत्इदंशरीरंअरुजंरोगरहितंस्वस्थंचयावत्जराइरतस्तिष्ठतियावत्ईन्द्रियाणांशक्तिरप्रतिहताअनगतायावत्
आयुषःक्षयोनहितावत्प्रथममेवपुरुषेणविदुषाज्ञानवताआत्मनःस्वस्यश्रेयसिकल्याणेमोक्षेप्रयत्नःकार्य
ःअत्रदृष्टान्तःयथाभवनेगृहेसंदीप्तेअग्निनादह्यमानेसतितस्मिन्कालेकूपस्यखननंप्रतिउद्यमःप्रयत्नःतथा
दृणा॥अस्मिन्कतिपयनिमेषायुषिजनेअल्पायुषिकिंकुर्मःकिंकर्तव्यंतत्नविद्मःनजानीमःकथंसन्तःतपर

यावत्स्वस्थमिदंशरीरमरुजंयावज्जरादूरतोयावच्चेन्द्रियशक्तिरप्रतिहतायावत्क्षयोनायुषः।
आत्मश्रेयसितावदेवविदुषाकार्यःप्रयत्नोमहान्संदीप्तेभवनेतुकूपखननंप्रत्युद्यमःकीदृशः॥
दृणा॥तपस्यन्तःसन्तःकिमधिनिवसामःसुरनदींगुणाधारादारानुतपरिचरामःसविनयान्॥पि
बामःशास्त्रौघानुतविविधकाव्यामृतरसान्नविद्मःकिंकुर्मःकतिपयनिमेषायुषिजने॥७८॥र
म्याश्चन्द्रमरीचयस्तृणवतीरम्यावनान्तस्थलीरम्यंतत्सुसमानमागमसुखंकालेषुरम्याःकथाः॥को
पोपाहितवाष्पहृत्तितरलंरम्यंप्रियायामुखंसर्वंरम्यमनित्यतामुपगतेचित्तेनकिंचित्पुनः॥७९

स्यन्तःतपश्चर्यांकुर्वन्तःनहितपःआचरणीयंकिंसुरनदींगङ्गांअधिनिवसामःततीरेनिवासंकुर्मःकिमुत
गुणैःउदारान्दारान्युवतीःविनयेनसहपरिचरामःपरिचर्यांकुर्मःउतशास्त्रौघान्पिबामःउतअथवाकाव्या
मृतरसान्पिबामःइति॥एकंनिश्चयात्मकंनजानीमः॥७८॥ ॥ ॥ ॥ ॥ ४५

वयंस्थूलामहतीइच्छायेषांतेअतःसुतरामत्यन्तंमहतिस्थूलेपदेपदप्राप्तोद्यतंमनोयेस्तेएवंभूताःसन्तःइति
कारणात्राजानःसेव्यास्तर्हिअमीक्षितिभुजःराजानोदुःखेनआराधितुमशक्याःतथाचतुरगःअश्वःसा॰
यथाचञ्चलःतद्वत्चित्तंयेषांतेअथचजराहेहंहरतिजीवितमपिसकलंमृत्युःहरतिएवंसतिहेसखेअ॰

दुराराध्याश्चामीतुरगचलचित्ताःक्षितिभृतःवयंचस्थूलेच्छाःसुमहतिपदेबद्धमनसः॥जरा
देहंमृत्युर्हरतिदयितंजीवितमिदंसखेनास्मिञ्छ्रेयोजगतिविदुषोन्यत्रतपसः॥७२॥रम्यंह
र्म्यतलंनकिंवसतयेश्राव्यंनगेयादिकंकिंवाप्राणसमासमागमसुखंनैवाधिकंप्रीतये।किंतु॰
भ्रान्तपतङ्गपक्षपवनव्यालोलदीपाङ्कुरच्छायाचञ्चलमाकलय्यसततंसन्तोवनान्तंग॰
ताः॥७३॥

स्मिन्जगतिलोकेविदुषःज्ञातुःतपसःअन्यत्परंश्रेयःकल्याणंनास्ति।७२।रम्यंहर्म्यतलंगृहंवसनयेनकिंश्रियं
गानादिकंश्राव्यंश्रोतुंयोग्यंगेयंकिंनप्राणेनसमाःप्रियास्तासांसमागमःसुखीतयेनैवकिंकिंतुभ्रान्तश्चासौपतङ्गश्च
तस्यपक्षयोःपवनंतेनव्यालोलाचञ्चलादीपाङ्कुरच्छायावत्चञ्चलमिदंसर्वमाकलय्यज्ञात्वासन्तःमहान्तःवनं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ०वै हे तात आसंसारं संसारमर्यादीकृत्य इदं त्रिभुवनं विचिन्वतामस्माकं । सतादृक् नयनगतो न श्रोत्रमार्गगतो
४६ पि न दृष्टः न श्रुतः योयं विषयएवकरिणी तस्यां गाढः दृढः गूढश्च अभिमानो यस्य एवं मत्तश्च क्षीबश्च मत्तश्च अ
न्तःकरणमेव करिणः गजस्य संयमः नियमः सएव आलानं गजबन्धनं तस्य लीलां विधत्ते दधाति॥१४॥मनो
रथाश्च हृदये जीर्णा एव नत यौवनं यातं गतं हन्त इति खेदे गुणान् जानन्ति ते गुणज्ञास्तैर्विना अङ्गेषु कर्मसु गुणा

आसंसारं त्रिभुवनमिदं चिन्वतां तात तादृक् नैवास्माकं नयनपदवीं श्रोत्रमार्गं गतो वा। योयं धत्ते वि
षयकरिणीगाढगूढाभिमानक्षीवस्यान्तःकरणकरिणः संयमालानलीलाम्॥१४॥जीर्णा एव मनो
रथाश्च हृदये यातं च तद्यौवनं हन्ताङ्गेषु गुणाश्च वन्ध्यफलतां याता गुणज्ञैर्विना॥ किं युक्तं सहसा
भ्युपैति बलवान्कालः कृतान्तोऽक्षमी सञ्चेयं मदनान्तकाङ्घ्रियुगलं मुक्त्वास्ति नान्या गतिः॥१५॥महे
श्वरे वा जगतामधीश्वरे जनार्दने वा जगदन्तरात्मनि॥ न वस्तुभेदप्रतिपत्तिरस्ति मे तथापि भक्तिस्तरुणेन्दु
शेखरे॥१६॥ अवन्ध्यतां निष्फलतां याताः प्राप्ताः कृतः अन्तो येन स कृतान्तः अक्षमी एव कालः बलवान् बलाढ्यः सह
साकस्मात् अभ्युपैति आगच्छति। एवं सति किं युक्तं मदनान्तकस्य शिवस्य अङ्घ्रियुगलं सन्निध्येयं तत्तन्ध्यातं तेन (
ध्यानेन विना मोक्षाय न अन्या गतिर्मार्गः॥१५॥ अथ विरक्तस्यैकत्र भक्तिनिष्ठा॥ जगतामधीश्वरे महेश्वरे जनार्दने
वा तथा जगदन्तरात्मनि वा वस्तुतः भेदस्य प्रतिपत्तिर्विप्रतिपत्तिर्नास्ति तथापि मम तरुणेन्दुशेखरे अङ्कुरे भक्तिरस्ति॥ ४६
१६

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्फुरन्तीस्फारावक्कलाज्योत्स्नाचन्द्रकलातयाधवलितेषुभ्रमतलेषुसरितःगङ्गायाःपुलिनेतीरेशान्तःध्वनिर्यासु
रजनीषुवयंसुखेनआसीनाःउपविष्टाःसन्तःशिवशिवशिवेत्युच्चैर्वचोवचनंयेषांतेएवंकदाकस्मिन्कालेयास्या
मःगच्छामःकथंभूतावयंभवस्यभोगःफणातयाउद्विग्नाःभीताःअन्तर्गतोवाष्पःरुदनंतेनआकुलाःव्याकुलाः
दृशौयेषांते॥७७॥वितीर्णेसर्वस्वेदत्तेसर्वद्रव्येसतिवयंसंसारंतरन्तःतर्ककामाःकदाकस्मिन्कालेपुण्येअर

स्फुरत्स्फारज्योत्स्नाधवलिततलेक्वापिपुलिनेसुखासीनाःशांतध्वनिषुरजनीषुद्युसरितः॥
भवाभोगोद्विग्नाःशिवशिवशिवेत्युच्चवचसःकदायास्यामोन्तर्गतबहुलबाष्पाकुलदृशः॥७
७॥वितीर्णेसर्वस्वेतरुणकरुणापूर्णहृदयास्मरन्तःसंसारंविरसपरिणामावधिगतम्॥कदापु
ण्यारण्येपरिगतशरच्चन्द्रकिरणास्त्रियामानेष्यामोहरचरणचिंतैकशरणाः॥७८॥ ❀ ।

ण्येहरचरणःचिन्तेएकंशरणंयेषांएवंभूताःत्रियामाःनिशानेष्यामःअतिक्रमिष्यामः॥कथंभूतावय
म्॥तरुणाद्दढाकरुणातयापरिपूर्णहृदयाःकथंभूतंसंसारं।विरसश्चासौपरिणामश्चपरिपाकश्च
तस्यअवधिंमर्यादांतांगतंविरसंप्राप्तम्।कथंभूतास्त्रियामाःपरिगतशरच्चन्द्रकिरणाः॥७८॥ ❀ ॥ ❀

For Private and Personal Use Only

कदाकस्मिन्कालेवाराणस्याममरतटिनीभागीरथीतस्यारोधसितीरेअहंवसन्कौपीनंवसानः कौपीनमात्रव
स्त्रः शिरसिअञ्जलिपुटंनमस्कारंनिदधानः।अयेतिकोमलानुमन्त्रणेहेगौरीनाथत्रिपुरहरशम्भोत्रिनयनइत्यादि
नामनिर्देशेनसंबोधनंकृत्वाप्रसीदप्रसन्नोभवइतिक्रोशन्उच्चैराक्रोशंकुर्वन्।निमिषमिवदिवसान्नेष्यामः अति
क्रमिष्यामः।८०।गाङ्गैः पयोभिः स्नानंकृत्वाहेविभोशुचिकुसुमानिफलानिचतैः त्वामर्चयित्वापूज्यध्येयेत्वा

कदावाराणस्याममरतटनीरोधसिवसन्वसानः कौपीनंशिरसिनिदधानोञ्जलिपुट
म्॥ अयेगौरीनाथत्रिपुरहरशम्भोत्रिनयनप्रसीदेत्याक्रोशन्निमिषमिवनेष्यामिदि
वसान्॥८०॥स्नात्वागाङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वाविभोत्वांध्येयेध्याने
निवेश्यक्षितिधरकुहरग्रावशय्यानिषण्णः॥आत्मारामः फलाशीगुरुवचनरत।
स्त्वत्प्रसादात्स्मरारेदुःखंमोक्ष्येकदाहंसमकरचरणेपुंसिसेवासमुत्थम्॥८१॥:॥

यिध्यानंमनसाचिंतनंनिवेश्यसंस्थाप्यक्षितिधरः पर्वतः तस्यकुहरेबिलेग्रावःपाषाणस्तस्यशय्यायांनिषण्णः आसीनः।
सन्आत्मन्येवआरामोयस्यसः फलानिअश्नातिभक्षयतिसः गुरुणायदुपदिष्टंतद्वचनेरतः एवंभूतः सन्हेस्मरारेत्वत्
प्रसादादहंकदादुःखंमोक्ष्येत्यक्ष्येकथंभूतंदुःखंसमकरचरणेसमक्षकरध्वजेसकामेपुंसिसेवायाः समुत्थमुत्पन्नम्
४७

अहौसर्पेहारेमुक्ताफलानांहारेवा।बलवतिरिपौशत्रौवासुहृदिहितकरेवा।मणौरत्नेलोष्टेमृत्खण्डेवा।कुसुमशय्यायांपुष्प
शय्यायांवादृषदिपाषाणेवा।तृणेवास्त्रैणेअपत्येवाइत्यादिषुसमादृष्टिर्यस्यसःसमदृशःदिवसाःकदायान्तिगच्छन्ति।क
थंभूतस्यममक्वचित्कुत्रचित्पुण्येअरण्येस्थितस्यशिवेतिनामावलिंप्रलपतःउच्चैराक्रोशेनवदतः।८१।पाणिंहस्तंपात्रंय
तांपात्रंकुर्वताम्।निसर्गेणस्वभावेनशुचिनातेनपाणिपात्रेणभैक्ष्यंकृत्वातेनभैक्ष्येणसंतुष्यताम्।संतोषंप्राप्नुवताम्।यत्र।

अहौवाहारेवाबलवतिरिपौवासुहृदिवामणौवालोष्टेवाकुसुमशयनेवादृषदिवा।तृणेवास्त्रैणेवामम
समदृशोयान्तुदिवसाःक्वचित्पुण्येरण्येशिवशिवशिवेतिप्रलपतः।८२।पाणिंपात्रयतांनिसर्गशुचिना
भैक्ष्येणसंतुष्यतांयत्रक्वापिनिषीदतांलघुतृणंविश्वंमुहुःपश्यताम्।अत्यागेपितनोरखण्डपरमा
नन्दावबोधस्पृहांमर्त्यःकोपिशिवप्रसादसुलभांसंपत्स्यतेयोगिनाम्।८३।एकाकीनिस्पृहःशान्तःपाणि
पात्रोदिगम्बरः।कदाशम्भोभविष्यामिकर्मनिर्मूलनक्षमः।८४।महीशय्याशय्याविपुलमुपधानंभुजलता
वितानंचाकाशंव्यजनमनुकूलोयमनिलः।स्फुरद्दीपश्चन्द्रोविरतिवनितासंगमुदितःसुखंशान्तःशेतेमुनि
रनुपमैश्वर्यन्नृपवत्।८५।

क्वापिस्थलेनिषीदतांआस्यतांविश्वंलघुतृणवत्मुहुःपश्यतांयोगिनांमध्येकोपिमनुष्यः।
शिवस्यप्रसादेनसुलभांशरीरस्यअत्यागेअत्यक्तेपिपरमानन्दावबोधस्यब्रह्मबोधस्यस्पृहामाकांक्षांसंपत्स्यतेप्राप्स्य।
ति।८३।८४।महीशय्यामेवशय्याभुजलतामेवविपुलंवृहदुपधानंउपवर्हणंआकाशंचवितानंअयमनुकूलःअनिलःपवः।

भ०वै० नःव्याजनं।चन्द्रस्फुरन्दीपः।विरतिःविरक्तिःसैववनितातस्याःसंगोमुदितःहर्षितःएवंभूतोमुनिःशान्तःसन्सुखंशेते
७८ निद्रांकरोतिकइवअनुपमैश्वर्यःनृपइव॥८५॥अथअवधूतचर्या॥शतखण्डंजर्जरतरंकौपीनंपुनःकंथापित्ता
दृशीकौपीनवत्॥निरपेक्ष्यंयदृच्छयाप्राप्तंभैक्ष्यंनदेवाशनं॥नदेवनैश्चिन्त्यम्॥स्मशानेवनेनिद्रास्वापं॥स्वातंत्र्ये
णस्वेच्छयानिरंकुशंअवार्यमाणंविहरणंक्रीडनंस्वांतंमनःप्रशांतं।योगमहोत्सवेपिस्थैर्यंएवंयस्यवैराग्येण

कौपीनंशतखण्डजर्जरतरंकन्थापुनःस्तादृशीनैश्चिन्त्यंनिरपेक्ष्यभैक्ष्यमशनंनिद्रा
स्मशानेवने॥स्वातंत्र्येणनिरङ्कुशंविहरणंस्वान्तंप्रशान्तंसदास्थैर्यंयोगमहोत्सवेपि
चयदित्रैलोक्यराज्येनकिम्॥८६॥भूपर्यङ्कोनिजभुजलताकन्दुकंखंवितानंदी
पश्चन्द्रेसुमतिवनितालब्धसंगप्रमोदः॥दिक्कान्ताभिःपवनचमरैर्वीज्यमानःस
मंतात्भिक्षुःशेतेनृपइवभुवित्यक्तसर्वस्पृहोपि॥८७॥ ॥ ॥ ॥ ॥

सामग्रीतस्यत्रैलोक्यराज्येनकिम्॥८६॥भूःपृथ्वीपर्यङ्कःस्वकीयाभुजलतासैवकन्दुकःउपधानं।खंआ
काशंवितानं॥चन्द्रोदीपःविरतिःविरक्तिःसैववनितातस्याःसंगःतेनप्रमोदःआनन्दः॥दिशःएवकान्ताः
ताभिःपवनःवायुस्तएवचामराःतैः।वीज्यमानःसन्भिक्षुःनृपइवभुविपृथ्व्यांत्यक्तसर्वस्पृहाइच्छायेन
सःएतादृशोपिशेतेनिद्रांकरोतिइत्यर्थः॥८७॥लिप्यकृतब्राह्मणरामकुमार॥श्रीमतेरामानुजायनमः॥ भ०

हे सखे मित्र ते केचित् विरला एव धन्याः कृतकृत्याः। ये वनान्ते रात्रिं नयन्ते। किंभूतां शरदश्चन्द्रस्तस्य ज्योत्स्ना तया धवलं
यद्गगनं तस्य आभोगः पूर्णता तेन सुभगां रम्याम्। किंभूताः त्रुटितः भवबन्धस्य व्यतिकरः क्लेशो येषां ते। पुनः चित्तस्यान्त
:मध्ये विषयाणां रूपादीनामाशा अभिलाषा तया विगलिताः शून्याः। पुनः सुकृतानां चयः समूह एव चित्तं धनं भूतं देवं एकं
मुख्यं शरणं रक्षकं येषां ते॥८७॥ प्रकृष्टा तनुर्यासां ललनानां भोगः परिष्वङ्गादिरूपस्तस्मिन् सुभगः कालः यौवन।

सखे धन्याः केचित् त्रुटितभवबन्धव्यतिकरा वनान्ते चित्तान्तर्विषमविषयाशा विगलिताः। शरच्चन्द्रज्यो
त्स्नाधवलगगनाभोगसुभगां नयन्ते ये रात्रिं सुकृतचयचित्तैकशरणाः॥८७॥ अतिक्रान्तः कालः प्रतनुलल
नाभोगसुभगो भ्रमन्तः श्रान्ताः स्मः सुचिरमिह संसारसरणौ॥ इदानीं स्वःसिन्धोस्तटभुवि समाक्रन्दनगि
रः सुतारैः फूत्कारैः शिव शिव शिवेति प्रतनुमः॥८८॥ माने म्लायिनि खण्डिते च वसुनि व्यर्थे प्रयातेऽर्थिनि क्षी
णे बन्धुजने गते परिजने नष्टे शनैर्यौवने॥ युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयःपूतग्रावगिरीन्
द्रकन्दरदरीकुञ्जे निवासोस्ति चेत्॥८९॥ रूपः अतिक्रान्तः। इह संसारमार्गे सुचिरं भ्रमन्तः श्रान्ताः खिन्नाः स्मः।
सुतारैः अत्युच्चैः फूत्कारैः पश्चात्तापश्वासैः सह शिव इति समाक्रन्दनमाक्रोशस्तस्य गिरः प्रतनुमः विस्तृताः कुर्मः॥८८॥ माने
विद्यादिजनिते माने म्लायिनि मलिने सति। वसुनि धने व्यर्थं खण्डिते नष्टे सति अर्थिनि व्यर्थे रिक्तं यथा भवति तथा प्रया
ते सति। एवं सर्वपुरुषार्थसाधने नष्टे सति। सुधियामेतदेव केवलं एकं युक्तं भवति। किं तत् जह्नुकन्याया गङ्गायाः पयः पूतग्रा
वगिरीन्द्रकन्दर

प्र०वै०

४९

रदरीकुञ्जे निवासोस्तीति यत्। चेदिति संमानयायद्येवं तर्ह्येव सा फल्यं नान्यथा॥८९॥ ईदृग्विधो योगेश्वरः शस्यते प्रश
स्तो भवति॥ स्वायत्तचेष्टः स्वाधीनक्रियः। दाना ऽऽदानाभ्यां विरक्तं शून्यं यन्मार्गं तस्मिन् रतः॥ निःस्वीयः। ममताशून्यः नि॥
रहङ्कृतिः अहन्ताशून्यः। शमः। शान्तिः दमः इन्द्रियनिग्रहः। ज्ञानं स्वस्वरूपज्ञानं एतेषु वशः स्पृहा येन सः॥९०॥ अयमु
न्मत्तः किं द्विजातिरथवा किं शूद्रः। अथ किं तापसस्तपस्वी॥ किं वा तत्त्वनिवेशपेशलमतिः सद्ज्ञानी। कोपि अनिर्वचनी॥

निःस्वाशी जनमध्यसंगरहितः स्वायत्तचेष्टः सदादाना ऽऽदानविरक्तमार्गनिरतो योगेश्वरः शस्यते। रथ्या
क्षीणविशीर्णजीर्णवसनः संप्राप्तकन्थासखो निःस्वीयो निरहङ्कृतिः शमदमज्ञानैकवद्धस्पृहः॥९०॥
उन्मत्तः किमयं द्विजातिरथवा शूद्रोथ किं तापसः किं वा तत्त्वनिवेशपेशलमतिर्योगेश्वरः कोपि किं॥
इत्युत्पन्नविकल्पमात्रमुखरैः संभाव्यमाना जनैर्न क्रुद्धा पथि नैव तुष्टमनसो यान्ति श्रियं योगिनः॥९
१॥ पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्ष्यमक्षय्यमन्नं विस्तीर्णं वस्त्रमाशादशकममलं तल्पमस्वल्पमुर्वी।
येषां निःसंगताङ्गीकरणपरिणतिः स्वात्मसंतोषिणस्ते धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति
९२॥

यो इमा दिषन्मत्तमः किमस्मि इत्युत्पन्नो यद्विकल्पमात्रस्तेन मुखरैर्वाचालैर्जनैः पथि संभाव्यमाना अपि न क्रुद्धा नापि तुष्टम
नसो योगिनः श्रियं यान्ति योगश्रीं लभन्ते॥९१॥ अङ्गीकरणमत्यन्तमजनस्वीकारस्तस्य परिणतिः फलं निःसंगता भव
ति। यत्वीकृतजनोपि ताहशो न भवती सर्वः। संन्यस्तस्त्यक्तः दैन्यव्यतिकरनिकरो दैन्यक्लेशसमूहो यैस्ते धन्याः कर्म निर्मूलय॥

हन्त हर्षे। हरिणैः सह परिचयः। संवासः फलैर्मेध्यैर्वृत्तिरन्नवृत्तिः। प्रतिनदि। नदीं नदीं प्रति। स्वस्तुष्ट्याः सदृशं वनं भवति। अथ
था स्वपुरीनिवासिनां चौरादिभयराहित्येन सर्वभोगप्राप्तिः। एवं हरभक्तिं स्पृहयतामपि वनं भयराहित्येन सुखप्रदम्। शे
षस्पष्टम्।८३। शय्येति। यैः सेवयाञ्जलिः शिरसि न बद्धः। इत्यर्थः स्वीकृतसेवया हेतुना राजसमीपे योऽयमा
ज्ञेति स्वीकारपूर्वकम् शिरसि हस्तौ न बद्धौ इति विस्तरतोऽर्थः। परमेश्वराः काङ्क्षणीयाभावात् अन्यत्स्पष्टम्।८४।आ

स्थितिः पुण्येऽरण्ये सह परिचयो हन्त हरिणैः फलैर्मेध्यैर्वृत्तिः प्रतिनदि च तल्पानि दृषदः। इतीयं सामग्री भव
ति हरभक्तिं स्पृहयतां वनं वै सन्तुष्ट्याः सदृशमुपशान्तैकमनसाम्॥८३॥ शय्या शैलशिला गृहं गिरिगुहा
वस्त्रं तरूणां त्वचः सारङ्गाः सुहृदो ननु क्षितिरुहां वृत्तिः फलैः कोमलैः॥ येषां निर्झरमम्बुपानमुचितं रत्यै
च विद्याङ्गना मन्ये ते परमेश्वराः शिरसि यैर्बद्धो न सेवाञ्जलिः॥८४॥ आशा नाम नदी मनोरथजला तृ
ष्णातरङ्गाकुला रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी॥ मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्
गचिन्तातटी तस्याः पारगता विशुद्धमनसो नन्दन्ति योगेश्वराः॥८५॥

शा नामा नदी वर्तते। तस्याः पारं प्र
सरणसीमानमतिक्रम्य गता आशागन्धरहिता योगेश्वराः नन्दन्ति। आनन्दं प्राप्नुवन्ति। अत्र योगिनं आशा वक्रुलजनस। श्री।
त्कारख्यातिरूपा। मनोरथाः प्रदिसः धनिक आगमिष्यति तर्हि परोपकारं तमुपदिश्य मठं कारयिष्यामीत्येवं भूताः। त
था अन्यः सः आगमिष्यति चेत्तमुपदिश्य अन्नदानार्थं भाजीवनं कारयिष्यामीत्येवं भूताः। कामः स्नेहः शिष्यादिषु। वितर्काः

भ० वै० इदं कथं भविष्यति। इदं कथं संपादयामीत्येवंरूपाः विहगा। मर्पीः। धैर्यध्यानादिच्युतदेवद्रुमः। मोहः असाध्येकर्मणि सति
५० अतिगहना अतिगम्भीरा। अयमव्यवहारज्ञः शिष्यः कथं मया निर्वाहयिष्यतीत्येवंभूता चिंता। अत्रायमभिप्रायः येत्य।
का शास्ता एव योगेश्वराः सत्याः अन्ये तु कनकाकृयगुल्मवत्॥ ९५॥ यदेतत्स्वाच्छंद्यं विहरणं गमनम्। अनिशमकार्प
ण्यमदैन्यम्। आर्यैः सह संवासः श्रुतं शास्त्रश्रवणं मुपशमफलकम्। वहिर्बाह्यविषये मन्दस्पन्दं चलनं यस्य तत् मनः॥

यदेतत्स्वाच्छन्द्यं विहरणमकार्पण्यमनिशं सहार्यैः संवासः श्रुतमुपशमैकव्रतफलम्। मनो मन्दस्पन्दं व
हिरपि चिरस्यापि विमृशन्न जाने कस्यैषा परिणतिरुदारस्य तपसः॥ ९६॥ महादेवो देवः सरिदपि च सै
षामरसरित् गुहा एवागारं वसनमपि ता एव हरितः॥ सुहृद्वा कालोऽयं व्रतमिदमदैन्यव्रतमिदं कियद्वा
वक्ष्यामो वटतरुजटा एव दयिताः॥ ९७॥ गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य ब्रह्मध्यानाभ्यसन
विधिना योगनिद्रां गतस्य॥ किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशङ्काः संप्राप्स्यन्ते जरठहरिणाः शृ
ङ्गकण्डूविनोदम्॥ ९८॥

मम जातमिति शेषः। एषा परिणतिः फलम् कस्य तपसः इति चिरस्यापि चिरमपि विमृ
शन्नहं न जाने। ९६। महादेवेति। महादेवः श्रीशिवः देवः पूज्यरूपः। वटतरुजटाः वटस्कन्धजा जटा एव दयिता आश्रयप्र
दत्वेन प्रियाः शेषं स्पष्टम्। ९७। गङ्गेति। तैः सुदिवसैर्मम किं भाव्यं भवितव्यम्। यत्र येषु। मयि स्थावरबुद्ध्या निर्विशङ्काः
शङ्काशून्यास्ते प्रसिद्धाः जरठहरिणाः वृद्धहरिणाः शृङ्गकण्डूतिसुखं संप्राप्स्यन्ते। पूर्वार्द्धे षष्ठ्यन्तविशेषणोऽस्पष्टे। ९८ ५०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुनरप्यर्थधर्मादिप्रदत्वेन काशीं स्तौति। यस्यामुद्यानेषु वनेषु प्रतिऋतु नूतनफलसंभवात्। विचित्रभोजनविधिरुत्पद्यते भव-
ति। तपस्तीव्रातितीव्रमित्यत्रानुष्ठानानुत्त्यासाधारणतपोपि क्षेत्रमहिम्ना तीव्रातितीव्रम्। कौपीनावरणं तन्मात्रमप्यावरणम-
मितं सुवस्त्रं महत्सुवस्त्रं शोभाप्रदत्वेन॥ एवं भिक्षाटनमपि मण्डनम्। आसन्नं समीपस्थं मरणं च मङ्गलसमम्। अन्यत्राम-
ङ्गलमपि। अत्र मोक्षप्रदत्वेन पुनर्जन्माभावमङ्गलरूपम्। हन्तेति खेदे संबोधने वा। तां काशीं परिहृत्य त्यक्त्वा विबुधैः पण्डि-
तैरन्यत्र क्षेत्रान्तरे किं स्थीयते अपि तु नेत्यर्थः। ९९। अथ मोक्षस्य मुख्यसाधनमाह॥ मनः शङ्करं शिवं प्रपत्तुं प्राप्तुमि-

उद्यानेषु विचित्रभोजनविधिस्तीव्रातितीव्रं तपः कौपीनावरणं सुवस्त्रममितं भिक्षाटनं मण्ड-
नम्॥ आसन्नं मरणं च मङ्गलसमं यस्यां समुत्पद्यते तां काशीं परिहृत्य हन्त विबुधैरन्यत्र किं स्थी-
यते॥ ९९॥ प्रशान्तशास्त्रार्थविचारचापलं निवृत्तनानारसकाव्यकौतुकम्॥ निरस्तनिःशेषवि-
कल्पविस्तरं प्रपत्तुमन्विच्छति शङ्करं मनः॥ १००॥ ॥ ॥

च्छति। किंभूतं मनः प्रशान्तं शास्त्राणामर्थेषु विचाररूपं चापलं चाञ्चल्यं यस्य॥ त्यक्तशास्त्रार्थलोलमित्यर्थः॥ पुनः निवृत्तं
नानाशृङ्गारादयो रसा येषु काव्येषु तेषु कौतुकमुत्साहो यस्य तत्॥ तथा निरस्तः विसर्जितः निःशेषाः समस्ताः वि-
कल्पा मनोरथास्तेषां विस्तरो विस्तारो यस्मात्॥ एतादृगेव मनः श्रीशङ्करप्राप्तियोग्यं नान्यत्॥ अत्रायमभि-
प्रायः त्यक्तसकलसाधनसाध्यपुरुषस्य शिवे मनोनियमनमेव मोक्षसाधनम्॥ १००॥ ॥ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ०वै०टी० इदानींयोगिनःपरब्रह्मणिलयमाह॥हेमेदिनिमातः।इहस्यपार्थिवत्वात्पृथिव्याःमातात्वम्।एवमितरसंबोधनेष्व
५१ पियथासंभवंहेत्वन्तराणि।पित्रादिसाधर्म्येणोपकारिणांपञ्चमहाभूतानांभवतांमयाएषअन्त्यप्रणामाञ्जलिर्नि
बद्धः।वियोगकालीनोनमस्कारःकृतः।इतःपरंमांत्यजन्त्वित्यर्थः॥अहंतुमातपित्रादिरूपाणांयुष्माकंसंगः
यथागृहस्थदशायांपित्रादिभिःसंवासआसीत्॥एवंदेहरूपेणयुष्मत्संगस्तस्यवशात्उपजातउद्भूतोयःसुकृ

मातर्मेदिनितातमारुतसखेतेजःसुबन्धोजलभ्रातर्व्योमनिबद्धएषभवतामन्त्यप्रणामाञ्जलिः॥युष्मत्संगवशोपजातसुकृतोद्रेकस्फुरन्निर्मलज्ञानापास्तसमस्तमोहमहिमालीयेपरब्रह्मणि॥१०॥इतिश्रीभर्तृहरिनृपकृतंवैराग्यशतकम्॥शतकत्रयंसमाप्तम्॥शुभंभवतु॥

तोद्रेकःपुण्याधिक्यंतेनस्फुरन्निर्मलज्ञानंतेनअपास्तोदूरीकृतःसमस्तमोहमहिमायस्यसःयथापूर्वंवैराग्यका
लेग्रामसीमापर्यंतंमन्निवर्तनार्थमागतानपिबन्धून्नमस्कारपूर्वकंस्वस्वगेहेनिवर्त्यवनंप्रविष्टः।एवमधुनायुष्मा
नपिसंत्यज्यपरब्रह्मणिस्वस्वरूपेलीयेप्रविष्टोभवामि।भवन्तस्तुस्वेस्वेरूपेलीयन्त्वित्यर्थोबोध्यम्।फलितार्थस्तुपर
ब्रह्मप्राप्तिरेवदेहफलमस्तीतिबोध्यम्॥१०॥इतिश्रीभर्तृहरिकृतशतकत्रयटीकायांवैराग्यशतकम्॥ ॥ ५१

For Private and Personal Use Only